तु स्यात् पूर्वनिवृत्तौ च पूर्वस्मादवधारणे ॥ २३ ॥
विलक्षणे विकल्पार्थे थो भवेद् भयरक्षणे ।
भूधरे च तथा भारे दो दाने दायकेऽपि च ॥ २४ ॥
दाने दातरि दा केचिद् विदुर्दो [2]छेदे-बन्धयोः ।
दं कलत्रं तथा धं च धीरे च धनदे [3]धने ॥ २५ ॥
धश्च चित्रेऽश्ववारे च धीर्बुद्धाविषुधावपि ।
गुह्यकेशे [4]विरिञ्चौ धा तथा धूर्भार-कम्पयोः ॥ २६ ॥
धूते धुराकम्पने च नो बुद्धौ [5]ज्ञान-बन्धयोः ।
अस्मानस्मभ्यमस्माकमेषां स्थाने भवेच्च नः ॥ २७ ॥
निषेधार्थेऽव्ययौ नो च नकारश्च नरस्तु ना ।
निः श्रुते नेतरि ख्यातो [6]नुः स्तुतौ च प्रकीर्त्तितः ॥ २८ ॥
निः स्यात् [7]क्षेपे च नित्यार्थे भृशार्था-ऽऽश्रय-राशिषु ।
कौशले बन्धने मोक्षे संशये [8]दारुकर्मणि ॥ २९ ॥
अधोभावोपरमयोः सन्निधानेऽव्ययो मतः ।
नुः प्रश्ने च वितर्के च विकल्पेऽनुशये[9]ऽव्ययः ॥ ३० ॥
तरण्यां नौस्तथा ख्यातः पः पाने पवने पथि ।
प्रौढे च वर्णके पश्च पा पातरि तथा श्रुते ॥ ३१ ॥
फकारो निष्फले जल्पे पुष्करे भयरक्षणे ।
[10]फं फा वाते फले फेने [11]फूत्कारे फूस्तथोदितः ॥ ३२ ॥

---

१ क. क्रोधे । २ ङ. वेध-बन्धयोः । ३ ग. ध्वने । ४ ख. ग. घ. विरञ्चौ । ५ ग. ज्ञानमन्दयोः । ६ क. ख. नुः स्तुतावव्ययोस्तु नौ । ग. नुस्तुताव्यययोस्तु नो । ७ ख. ग. क्षये । ८ ख. ग. दानकर्मणि । ९ क. ये पुनः । १० क. ख. ङ. झञ्झावाते । ११ ख. ग. पूत्कारे ।

ब[1]ः कुम्भे वरुणे पद्मे कलहे विगतौ तथा ।
भश्चालि-शुक्रयोर्भावे भा च दीप्तौ भये तु भीः ॥ ३३ ॥
भं धिष्ण्ये भूर्भुवि स्थाने मश्चन्द्रे च विधौ शिवे ।
मौलौ च बन्धने मूः स्यान्मा माने वा[2]रणेऽव्ययः ॥ ३४ ॥
अस्मच्छब्दे द्वितीयायां मा च षष्ठ्यां च मे पुनः ।
मा मातरि तथा लक्ष्म्यां यस्तु वाते यमेऽपि च ॥ ३५ ॥
धा[3]तर्यपि पशौ यः स्याद् या याने यातरि श्रियाम् ।
खट्वाङ्गेऽपि च रः कामे तीक्ष्णे वैश्वानरे नरे ॥ ३६ ॥
रामे वज्रे च शब्दे स्याद् रा द्रव्ये कनके पुनः ।
आश्रये नीरदे च स्याद् रुः सूर्ये रक्षणेऽपि च ॥ ३७ ॥
भये शब्दे च री[4] भ्रान्तौ लकारश्चलने पुनः ।
लाऽऽदाने लूश्च लवने लश्च लौ[5]श्च बिडौजसि ॥ ३८ ॥
लश्चामृते दि[6]शायां च लीः श्लेषे वलये तथा ।
वो वाते वरुणे रुद्रे सान्त्वने चाव्ययः पुनः ॥ ३९ ॥
एवार्थे[7] उपमाने च विकल्पे च समुच्चये ।
विः श्रेष्ठेऽतीते नानार्थे वै हेतौ पादपूरणे ॥ ४० ॥
द्वितीयायाश्चतुर्थ्याश्च षष्ठ्या युष्मद्बहुत्वके ।
वश्चाऽऽसां च विभक्तीनां द्वित्वे वां कथितो बुधैः ॥ ४१ ॥
आकाशे विहगे वि[9]श्च शं श्रेयसि सुखेऽव्ययः ।
शा[10] तु शान्ते च सास्नायां शीः शये हिंसनेऽपि च ॥ ४२ ॥
शुश्चन्द्रे षः स[11]दारः स्यात्तथेष्टे प्रसवे तु षूः ।
सः सूर्ये च परोक्षे च सं श[12]ङ्कावव्ययस्तु सम् ॥ ४३ ॥

---

१ क. ख. ग. बकारो । २ घ. च. मारणे । ३ घ. च. यश्च धातरि सूर्ये । ४ घ. रा । ५ घ. च. लूश्च । ६ ख. दयायां । ७ क. ख. ग. ङ. पदार्थे । ८ घ. च. छे भीते । ९ घ. च. विश्वे । १० ग. घ. च. शस्तु । ११ क. सादरः । १२ च. सङ्कोचेऽव्ययस्तु ।

सङ्गार्थे शोभनार्थे च प्रकृष्टार्थ-समर्थयोः ।
प्रथमान्तस्तदः स्थाने स्मृतौ लक्ष्म्यां च सोच्यते ॥ ४४ ॥

हः शूलिनि करे नीरे क्रोधे गर्भप्रभाषणे ।
निवासेऽथाव्ययो हः स्यात् सम्बुद्धौ पादपूरणे ॥ ४५ ॥

अव्ययो हा स्मृतः शोके तथा दुःख-विषादयोः ।
हि हेतौ पादपूर्त्तौ च विशेषे चावधारणे ॥ ४६ ॥

स्फुटे दानेऽथाव्ययो ही दुः[1]खे हेतौ च विस्मये ।
विषादे चाव्ययो हं त्वे[2]नुनये कोपभाषणे ॥ ४७ ॥

हुमव्ययः परिप्रश्ने वितर्के वचने तु हौ ।
हे कुत्सायां तथा हे[3] तु हूतौ सम्बोधने तु हौ[4] ॥ ४८ ॥

राक्षसे क्षस्तथा क्षेत्रे शब्दा ये द्व्यक्षरादयः ।
स्वरान्ता व्यञ्जनान्ताश्च ज्ञेया ग्रन्थान्तरात्तु ते ॥ ४९ ॥

मलधारिगच्छभर्तुः सूरेः श्रीराजशेखरस्य गुरोः ।
शिष्यः सुधाकलश इत्येकाक्षरनाममालिकामतनोत् ॥ ५० ॥

॥ इत्येकाक्षरनाममाला सम्पूर्णा ॥ [८]

*

---

१ घ. च. दुःखहेतौ । २ घ. च. तु नये काये च भाषणे । ङ. हं त्वनये कोपे प्रभाषणे । ३ घ. च. हेतौ । ४ क. हा ।

[९] महाक्षपणकविरचित एकाक्षरकोषः ।

आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात् ।
एतदेकाक्षरं नामाऽभिधानं क्रियते मया ॥ १ ॥
कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः ।
कश्चाऽऽत्मनि समाख्यातः कः प्रकाश उदाहृतः ॥ २ ॥
कं शिरो जलमाख्यातं कं सुखेऽपि प्रकीर्त्तितम् ।
पृथिवी कुः समाख्याता कुः[1] शब्दे कुत्सितेऽपि च ॥ ३ ॥
खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ।
स्वर्लोकेऽपि च खं प्रोक्तं खे[2]ः सामान्ये प्रकीर्त्तितः ॥ ४ ॥
गो[3] गणेशः समाख्यातो गन्धर्वो गः प्रकीर्त्तितः ।
गं[4] च गीतं च गा गाथा गौश्च धेनुः सरस्वती ॥ ५ ॥
घो घण्टेति समाख्यातो किङ्किणी घः प्रकीर्त्तितः ।
घो मेघश्च समाख्यातो घूर्घनं चापि कीर्त्तितम् ॥ ६ ॥
हनने घः समाख्यातो घूर्घोणाऽपि प्रकीर्त्तिता ।
ङकारो भैरवे ख्यातो ङकारो विषयः स्मृतः ॥ ७ ॥
चन्द्रमा चः समाख्यातश्चस्तस्कर उदाहृतः ।
निर्मलं छं समाख्यातं तरलं छं प्रकीर्त्तितम् ॥ ८ ॥
छेदने[5] छं समाख्यातं शिरसि छः प्रकीर्त्तितः ।
वेगिते जः समाख्यातो जनने[6] जः प्रकीर्तितः ॥ ९ ॥
जेता[7] जश्च समाख्यातः सूरिभिः शब्दशासने ।
झो[8] रवावपि निर्दिष्टो विषयो झः प्रकीर्त्तितः ॥ १० ॥

---

१ ख. ग. कुशब्दः कुत्सितेऽपि च । २ ख. खं शून्येऽपि प्रकीर्त्तितम् । ३ ख. गो गणपतिरुद्दिष्टो । ४ क. गं च गीता च गाथा च गा धेनुश्च सरस्वती । ख. गं च गीतं तथा गाथा गौ धेनुश्च सरस्वती. । ५ ग. म्लेच्छश्छस्तु समाख्यातो । ६ क. जयने । ७ ख. जेता जिश्च । ८ ग. भैरवेऽपि च निर्दिष्टोऽपथ्येऽपि झः प्रकीर्तितः ।

झञ्झावायुर्झकारः स्यान्नष्टे झः समुदाहृतः ।
ञकारो गायने प्रोक्तो ञकारो घर्घरध्वनौ ॥ ११ ॥
ट[1]ः पृथि[2]व्यां समाख्यात[3]ष्टकारश्च ध्वनावपि ।
[4]ठो महेशः समाख्यातः ठः शून्ये च प्रकीर्त्तितः ॥ १२ ॥
बृहद्ध्वनौ च ठः प्रोक्तस्तथा च शशिमण्डले ।
डकारः शङ्करे त्रासे डकारो ध्वनि[5]रुच्यते ॥ १३ ॥
[6]ढकारः कथितो ध्वाने ढो हि विश्वेश्वरेऽपि च ।
णकारः कथितो ज्ञाने निर्णये निश्चयेऽपि च ॥ १४ ॥
तः स्याच्चारे तथा चौरे क्रोडपुच्छे[7] प्रकीर्त्तितः ।
शिलोच्चये थकारः स्यात् थकारो[8] लक्षणे स्मृतः ॥ १५ ॥
द[9]ः कलत्रे दोहने च छेदे दाने च दातरि ।
धो धर्मे च धना[10]ध्यक्षे धो धातौ[11] धर्मवानपि ॥ १६ ॥
धं धने बन्धने बोधे धा ध्वनौ धिर्मणावपि ।
धिषणा धीः समाख्याता धु[12]श्चैव भाव-चिन्तयोः ॥ १७ ॥
स्याद् भारेऽपि च धूःशब्दस्तथैव भय-वेतने ।
न[13]कारः स्वागते बन्धौ नुः स्तुतौ वृद्धि-वृक्षयोः ॥ १८ ॥
नेता नश्च समाख्यातस्तरणौ नः प्रकीर्त्तितः ।
पवने पः समाख्यातः प[14]स्तु पाने प्रकीर्त्तितः ॥ १९ ॥

---

१ ग. जनता (जननी) जनके टश्च। २ व्यां कण्टके च टका क. प्रतौ पाठान्तरम्। ३ ख. तष्टष्टङ्कार उदाहृतः । ४ ग. ठो महेशे मठे ठः स्यात्तथा शून्ये प्रकीर्तितः । ५ गर्भे उच्यते क. प्रतौ पाठा० । ६ ख. ढकारः कीर्त्तितो ढक्का निर्गुणे निर्धनेऽपि च। ग. ढकारः कीर्त्तितो ढक्का निर्गुणे च ध्वनावपि । ७ च्छेऽपि तच्छ(क्ष)के. क. प्रतौ पाठा०। ८ ख. ग. थकारो भयरक्षणे। ९ ख. दं कलत्रं बुधैः प्रोक्तं दान-च्छेदन-दातृषु। ग. दं कलत्रं बुधैः प्रोक्तं छेदे दाने च दातरि ॥ १० ख. धनेशे च । ११ ता धी मतावपि क. प्रतौ पाठा०, असङ्गतोऽयं पाठः । १२ क. धर्मे धश्च प्रकीर्त्तितः । १३ ग. नकारः सौगते बुद्धौ नुः । १४ ख. पाऽथ पाने च पातरि ।

प[1]ः कुबेरः समाख्यातः पश्चिमे पः प्रकीर्त्तितः ।
फ आह्वाने च वाते च विख्यातो वासनेऽपि फः ॥ २० ॥
फूः फूत्कारे च फूः फूत्के प्रोक्तो निष्फलभाषणे ।
प्रचेता बः समाख्यातो बः फले कलशेऽपि च ॥ २१ ॥
बः पक्षी बिः समाख्यातो गगने बिः प्रकीर्त्तितः ।
वक्षःस्थले च बः प्रोक्तो गदा बः समुदाहृता ॥ २२ ॥
भं नक्षत्रं बुधैरुक्तं भ्रमरे च वने च भः ।
दीप्तिर्[2]भा चापि भूर्भूमिर्[3]भीर्भीतौ कथिता बुधैः ॥ २३ ॥
मः शिवश्चन्द्रमा वेधा मा लक्ष्मीः परिकीर्तिता ।
मा च मातरि माने च बन्धने मः प्रकीर्त्तितः ॥ २४ ॥
यं यशः कथितं शिष्टैर्यो वायुरिति शब्दितः ।
[4]यां याने यातरि [5]यस्त्यागे कथितः शब्दवेदिभिः ॥ २५ ॥
[6]रश्च कामे च रः सूर्ये शब्दे रश्च प्रकीर्त्तितः ।
इन्द्रिये धनरोधे च भये रश्च प्रकीर्त्तितः ॥ २६ ॥
ईश्वरे चालिने वह्नौ रु स्याद् भूमि-रि (ऋ) चावपि ।
ल इन्द्रे लवणे लृः (लः) स्याल्लाऽऽदाने च प्रकीर्तितः ॥ २७ ॥
दीप्तिर्ला चापि लूर्भूमिर्लीर्भये च प्रकीर्त्तितः ।
[7]लीं श्लेषे वलये चैव साधने कथिता बुधैः ॥ २८ ॥
सत्वरे वारुणे वाते वकारः परिकीर्त्तितः ।
वो वह्निर्वो बुधः श्रेयः शश्च शर्वो निगद्यते ॥ २९ ॥
[8]शं श्रेयः शी शये चैव शश्च शास्त्रे निगद्यते ।
शयने शमिति प्राहुर्हिंसायां शूश्च कथ्यते ॥ ३० ॥

---

१ पकारः पार्श्वके पृष्ठे क. प्रतौ पाठान्तरम् । २ ख. °र्भाश्चैव भूर्भूमि° । क. °र्भावश्च भूर्भूमि° । ३ ख. मिर्भीर्भयं समुदाहृतम् । ख. °मिर्भीर्भीमो कथिता बुधैः । ४ ख. पाने पातरि यस्त्यागे । ग. दाने यातरि यस्त्यागे । ५ यस्त्यागे क. प्रतौ पाठा° । ६ ख. ग. रश्च कामे गते सूर्ये । ७ ख. ली श्लेषणे वलये चैव कथितः शब्दकोविदैः । ८ ख. ग. वदन्ति शं बुधाः श्रेयः शं च शास्त्रे निगद्यते ।

षः कीर्तितो बुधैः श्रेष्ठः षश्च गम्भीरलोचने ।
षकारः कीर्त्तितः खड्गे षश्च गर्भविमोचने ॥ ३१ ॥
षः कीर्त्तिश्च बुधैः प्रोक्ता गौरी षा च ष ईश्वरः ।
षोपसर्गः समाख्यातो षूश्च स्वर्गविमोचने ॥ ३२ ॥
सः कोपे सश्च धनुषि सः परोक्ष उदाहृतः ।
सा च लक्ष्मीर्बुधैः प्रोक्ता सा गौरी स च ईश्वरः ॥ ३३ ॥
सः कामे वरणे प्रोक्तस्तथा शूलिनि कीर्त्तितः ।
सत्कारे वारणे [1]ख्यातो हकारश्च शिवे तथा ॥ ३४ ॥
हिश्च छेदे समाख्यातो हा गर्तेषु निगद्यते ।
हिः पाद्याचरणे प्रोक्तो हिः स्याद्धेत्ववधारणे ॥ ३५ ॥
क्षेत्रे च क्षः स्थले प्रोक्तः क्षेत्रपाले च क्षो मतः ।
क्षिः क्षेत्रे च क्षणेऽपि स्यान्नृसिंहे च[2] प्रकीर्त्तितः ॥ ३६ ॥
अकारो वासुदेवः स्यादाकारश्च पितामहः ।
प्रलये वातमण्डल्यामाकारः परिकीर्त्तितः ॥ ३७ ॥
इकारः कथ्यते कामो लक्ष्मीरीकार उच्यते ।
उकारः शङ्करे विष्णा[3]वूकारो ब्रह्मणि स्मृतः ॥ ३८ ॥
ऋकारो देवमाता स्याद् ॠकारः स्वर्ग उच्यते ।
ऌकारो देवयोनीनां माता च दनुजप्रसूः ॥ ३९ ॥
ॡकारः स्मर्यते पूर्वैर्जननी शब्दकोविदैः ।
एकार उच्यते विष्णुरैकारः स्यान्महेश्वरः ॥ ४० ॥
ओ[4]कारस्तु भवेद् ब्रह्मा औकारोऽनन्त उच्यते ।
अं च स्यात् परमब्रह्म अस्तथा च महेश्वरः ॥ ४१ ॥

इति श्री[5]महाक्षपणकविरचित एकाक्षरकोषः ॥ [९]

*

---

१ ख. ग. हः स्यात्तथा शूली निगद्यते । २ चापि शासने क. प्रतौ पाठान्तरम् ।
३ ष्णावूकारश्चापि रक्षणे. क. प्रतौ पाठा० । ४ ग. ओकारो भैरवो देवो ।
५ एकाक्षरार्थसंलापः स्मृतः क्षपणकादिभिः क. प्रतौ पाठा० ।

[१०] परमानन्दनन्दनविरचित

एकाक्षरीयप्रथमकाण्डः ।

यद्ध्यानात् प्राणिनां सद्यो भवन्ति विपुलाः श्रियः ।
चिदानन्दस्वरूपाय तस्मै गोस्वामिने नमः ॥ १ ॥
यत्स्वरूपेण संव्याप्तं समस्तं वाङ्मयं परम् ।
विष्णुनेव जगत् तस्यै नमस्कुर्यां गिरे सदा ॥ २ ॥
अन्येषामुपकाराय निजबोधाय च स्फुटम् ।
नामपारायणं वक्ष्ये नानावर्गैरहं मुदा ॥ ३ ॥

अः कृष्णे गरुडेऽप्याश्च द्रुहिणे पुष्पकेतने ।
आ निपातः स्मृतौ वाक्ये कोप-सन्तापयोस्तथा ॥ ४ ॥
ईषदर्थ-क्रियायोग-सीमा-ऽभिव्याप्तिषूक्त आङ् ।
इः कामे कल्मषे चापि निपातः खेद-कुत्सयोः ॥ ५ ॥
ईर्लक्ष्मी-धरयोरुश्च शम्भौ मोक्षोर्द्ध्व-शक्तिषु ।
भावे स्यादुत् प्रकाशे च निपातः क्रोध-लोभयोः ॥ ६ ॥
विभागे बन्धने चापि ऊर्गुरौ पालने वने ।
ऋर्देवमातरि क्ष्मायां ॠकारो दैत्यमातरि ॥ ७ ॥

ऌर्देव्यां ॡस्तु वाराह्यां लताभेदेऽपि कीर्त्तितः ।
एर्विष्णु-शैलयोरैश्च शम्भावोर्धातरि स्मृतः ॥ ८ ॥
अं वेधसि तथा रुद्रेऽप्यंकारः कथितो बुधैः ।
कं जले मस्तके सौख्ये कः स्वर्गे स्मर-सूर्ययोः ॥ ९ ॥
ब्रह्म-वायु-सुहृत्-केकि-वह्न्युद्द्योत-यमा-ऽऽत्मसु ।
कुः पापीयसि मह्यां च निवारण-कुशब्दयोः ॥ १० ॥
किमाश्चर्ये वितर्के च प्रश्ने क्षेप-जुगुप्सयोः ।
कियत्यथ खमित्युक्तमिन्द्रिया-ऽऽकाशयोर्नृपे ॥ ११ ॥

चन्द्रबिम्बे वर्ण-खण्ड-संवित्-स्वर्ग-सुखेषु च ।
खो रवौ कथितं गीते गं गस्तु गणनायके ॥ १२ ॥
गीत-गात्रोरप्याख्यातो गौर्जलं वज्र-बाणयोः ।
वृष-धेन्वोर्गिरौ वाचि नेत्र-दिग्-भू-सुखेषु च ॥ १३ ॥
रश्मि-वह्न्योश्च सत्या-ऽक्षि-स्वर्ग-मातृषु भाषितः ।
गीश्च वाण्यां दिशा-ब्राह्म्योर्दुर्गायामथ घो घटे ॥ १४ ॥
रुद्रे च हनने घा तु क्षुद्र-घण्टौ घनध्वनौ ।
ङकारो विषये भीमे चः सूरौ चन्द्र-चोरयोः ॥ १५ ॥
चाऽव्ययं च समाहारे पक्षान्तर-समानयोः ।
कारणे पादपूर्तौ च विनियोग-समस्तयोः ॥ १६ ॥
चुः कोकेऽप्यथ संस्थाने जश्चारे छेदके रवौ ।
जं वृत्ते निर्मले प्रोक्तं जोऽथ केशव-जीवयोः ॥ १७ ॥
जूर्व्योमवाचि जवन-पिशाच्योः कीटकेऽपि च ।
झो मञ्जुलसमीरे स्यान्नष्टेऽपि परिकीर्त्तितः ॥ १८ ॥
ञो मुनौ चतुरे चन्द्रपुत्रे ब्रह्मणि ञः पुनः ।
गायने घर्घरध्वाने गूढ-रूपकयोस्तथा ॥ १९ ॥
टो भूमि-वायु-शब्देषु शरीरास्थनि टं पुनः ।
गवि ठः सुस्वने रुद्रे चन्द्रमण्डल-शून्ययोः ॥ २० ॥
डः शब्द-भर्गयोर्ध्वाने ढो ढक्का-ऽध्वविशेषयोः ।
णस्तु निःश्रेयसे स्पष्टे निष्फलेऽपि समर्थितः ॥ २१ ॥
तशब्दस्तस्करे पुच्छे क्रोडे युद्धेऽपि ता श्रियाम् ।
धरिण्यामपि ताशब्दस्त्वक् च वल्कल-चर्मणोः ॥ २२ ॥
त्विड् च वाण्यां प्रभायां च जिगीषा-व्यवसाययोः ।
रुचौ तृट् च मता लोभ-तृष्णयोस्तु स्मृतौ पुनः ॥ २३ ॥
अव्ययं तु समाहार-साकल्य-करणेष्वपि ।
थो भयाद् रक्षणे भूध्रे दम्पत्यां दा प्रदेशने ॥ २४ ॥

दाष्णु(?)-बन्धनयोर्दृक् स्यान्नेत्र-दर्शनयोरपि ।
द्यौः स्वर्ग-नभसोर्द्युस्तु वह्नि-वासरयोरथ ॥ २५ ॥
धः पुनर्धनदे धीराश्ववारक-सुचित्रयोः ।
धं वृक्णे धीस्तु बुद्धौ स्यान्निषङ्गे धा तु धातरि ॥ २६ ॥
गुह्यकेशेऽथ धूर्धूते भरे कम्प-रथास्ययोः ।
नो ज्ञान-स्थानयोर्बुद्धे निर्बन्धेऽस्माकमप्यतः ॥ २७ ॥
अस्मानस्मभ्यमप्येवं नुः स्तवेन्वव्ययं पुनः ।
विकल्प-प्रश्नयोस्तर्के निर्भरेऽनुशये नृपे ॥ २८ ॥
निः क्रीते निश्चये व्यूहे निषेधे नो-न-नाः पुनः ।
निपाताः प्रतिषेधार्थां नीर्धुन्यां नौस्तरी मता ॥ २९ ॥
न्यग् नीच-कात्स्न्र्ययोर्निम्ने पोऽम्भः पाने च पातरि ।
समीर-मार्गयोः प्रौढे पूस्तु देह-पुरोरपि ॥ ३० ॥
फो डण्डापवने फेने फूर्वातूल-कर्पूरयोः ।
बि नरेऽवस्करे वैश्ये बः पद्म-घटयोरपि ॥ ३१ ॥
बिः पक्षि-नभसोर्बस्तु प्रचेतसि च शङ्करे ।
बाग् वचः-श्रतदेव्योः स्याद् बौपम्येऽव्ययमीरितम् ॥ ३२ ॥
भः काव्ये भ्रमरे भं तु धिष्ण्य-राश्योश्च भाः करे ।
प्रभावे साध्वसे भीः स्यात् स्थित्युत्पत्ति-महीषु भूः ॥ ३३ ॥
मः शिवे चन्द्र-विध्योश्च मा लक्ष्म्यां मातृ-मानयोः ।
निषेधे माऽव्ययं ख्यातं मा निशाकर-मासयोः ॥ ३४ ॥
मूर्बन्ध-वेश्मनोर्योऽथ ब्रह्म-वात-यमेषु च ।
यं जले या रमा-यात्रोः खट्वाङ्ग-रथयोरपि ॥ ३५ ॥
रः काम-वह्नि-शब्देषु तीव्रे रामे नरे पवौ ।
राः स्वर्ण-धनयोर्मेघे स्थानके रुर्भये ध्वनौ ॥ ३६ ॥
रक्षणा-ऽऽदित्ययो रीस्तु भ्रमे रुक् [छ]वि-वाञ्छयोः ।
घृणि-रुग्व्यथयोश्चापि रै हूतावव्ययं स्मृतम् ॥ ३७ ॥

लोऽमृते चलने शक्रे लाऽऽदाने लीस्तु कङ्कणे ।
श्लेष-बन्धनयोः श्रीश्च सरलद्रव-सम्पदोः ॥ ३८ ॥

लक्ष्मी-प्रभा-भारतीषु शं सुख-श्रेयसोरपि ।
शीः स्वापे शुर्निशानाथे षूः प्रसूतौ च षो वरे ॥ ३९ ॥

सा लक्ष्म्यां सः परोक्षे स्वो ज्ञातावात्मनि च स्मृतः ।
स्वरव्ययं स्वर्ग-भद्र-परलोकगतिष्वथ ॥ ४० ॥

सच्छब्दः पूजिते सत्ये साधु-शोभनयोः सति ।
स्वं निजे द्रविणे होऽथ वीरे रुद्रे भयङ्करे ॥ ४१ ॥

ह सम्बुद्धौ पादपूर्त्तौ हा दुःखे शुग्-विषादयोः ।
ही विस्मये विषादे हुं स्वापे प्रश्न-वितर्कयोः ॥ ४२ ॥

हे सम्बुद्धौ हुं च खेदे क्रोधोक्तौ संस्मृतावपि ।
हि हेतौ पादपूर्त्तौ च क्षः क्षेत्रे रक्षसि क्षमे ॥ ४३ ॥

विश्वप्रकाशा-ऽमर-हेममुख्यनामाकरान् भूरितरान् निरीक्ष्य ।
शिशुप्रबोधाय कृतो विचारः श्रीमज्जगन्नाथपदप्रसत्त्या ॥४४॥

श्रीगढमलपुत्र श्रीमत् परमानन्दनन्दन [मकरन्ददास]
विरचितायां परमानन्दीयनाममालायां प्रथमः काण्डः
समाप्तः [१०] ॥

---

[११] वररुचिविद्वत्कृता एकाक्षरनाममाला ।

[1]गं गामुमामुमौ मो[2]मं सन्नम्य व्याहराम्यहम् ।
काव्यकौशलसिद्ध्यर्थमेकाक्षरनिघण्टुकम् ॥ १ ॥
अकारो वासुदेवः स्यादाकारस्तु पितामहः ।
इकार उच्यते कामो लक्ष्मीरीका[3]र उच्यते ॥ २ ॥
उकारः शङ्करे प्रोक्त ऊकारस्त्विह [4]रक्षणे ।
ऋकारो देवमाता स्याद् ॠ[5] धाता तु प्रकीर्त्तितः ॥ ३ ॥
ऌकारो देवयोनीनां ॡ धाता तु प्रकीर्त्तितः ।
एकार उच्यते विष्णुरैकारः स्यान्महेश्वरः ॥ ४ ॥
ओकार उच्यते ब्रह्मा औकारोऽनन्त [6]उच्यते ।
अं भवेत् परमं ब्रह्म अँः स्याच्चैव महेश्वरः ॥ ५ ॥
कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः ।
क आत्मा च समाख्यातः प्रकाशे क उदाहृतः ॥ ६ ॥
सखा कश्च बुधैरुक्तो मुखे सूर्येऽपि कः स्मृतः ।
कं शिरो जलमाख्यातं कं सुखे परिकीर्त्तितम् ॥ ७ ॥
पृथिव्यां कुः समाख्यातः कुशब्दः कुत्सितेऽपि च ।
खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ॥ ८ ॥
स्वर्गेऽपि च खं संप्रोक्तं शून्ये खड्गेऽपि खं स्मृतम् ।
खगोऽपि खः समाख्यातः स्वर्गेऽपि ख उदाहृतः ॥ ९ ॥
सूर्येऽपि खः समाख्यातः शून्यार्द्धे खमपि स्मृतम् ।
बिन्दौ सुखे श्रोतसि खं कथितं पूर्वसूरिभिः ॥ १० ॥

---

१ गं गणेशम्, गां भारतीम्, उमां पार्वतीम्, उमौ ब्रह्म-रुद्रौ, मां लक्ष्मीम्, अं विष्णुम् । २ ग. मामे । ३ ख. ०रमेव च । ४ ख. लक्षणे । ग. लक्ष्मणे । ५ ग. ऋकारो दनुजप्रसूः । ६ ख. एव च । ७ क. ग. अः इति स्यान्महेश्वरः । ८ ख. शिखी । ९ ख. मूर्खे ।

गो गणपतिरुद्दिष्टो गो गन्धर्वे प्रकीर्तितः ।
गं[1] च गीतं गश्च गाता गौर्धेनुर्गौः सरस्वती ॥ ११ ॥
गौर्वाणी[2] च समाख्याता गावो बाणाः प्रकीर्त्तिता ।
दिशि भू-रश्मि-वज्रेषु गौरक्षिण स्वर्ग-चारिणि ॥ १२ ॥
घो घण्टायां समाख्यातः किङ्किणी[3] घा प्रकीर्त्तिता ।
हनने घर्घरे[4] घोषेऽन्तर्घाते घो घटेऽपि च ॥ १३ ॥
ङकारो[5] भैरवे प्रोक्तो ङकारो विषये स्मृतः ।
चश्चन्द्रमाः समाख्यातस्तस्करश्चा उदाहृताः ॥ १४ ॥
चुं[6]श्चकोरे चकारोऽपि पक्षान्तरे समुच्चये ।
निर्मलं छं समाख्यातं त[7]डिच्छः सम्प्रकीर्त्तितः ॥ १५ ॥
छेदने छः समाख्यातः सूक्ष्मेऽपि छ उदाहृतः ।
छ[8]न्दःसु छं समाख्यातं छश्च संवरणेऽपि च ॥ १६ ॥
वेगिते[9] जः समाख्यातो जनने जः प्रकीर्त्तितः ।
जं[10]स्तेजसि समाख्यातो जेता जश्च प्रकीर्त्तितः ॥ १७ ॥
चारुचारो झकारः स्याज्झक्तं झः समुदाहृतः ।
झञ्झावायुर्झकारः स्याज्झषो झः समुदाहृतः ॥ १८ ॥
ञकारो गूढरूपेषु ञकारो व्यूहिते[11]ऽपि च ।
ञकारो गायने प्रोक्तो ञकारो घर्घरे ध्वनौ ॥ १९ ॥
टः पृथिव्यां चकोरेऽब्दे टं टो वायौ प्रकीर्त्तितः ।
ठो महेशः समाख्यातः ठश्च शून्ये प्रकीर्त्तितः ॥ २० ॥

---

१ ख. गतगीतश्च गा माता गौर्धेनुर्गौः सरस्वती । ग. गं गीतं गो भवेद् गाथा गौश्च धेनुः सरस्वती । २ ग. गौर्वाणी गो भवेन्माता । ३ क. ख. किङ्किणीषु प्रकीर्त्तितः । ४ क. घुर्घुरे । ५ ग. ङकारश्चौरे विख्यातो । ६ ग. चुश्चौरेऽपि । ७ ग. तरणिश्छः प्रकीर्तितः । ८ क. ख. छन्दश्च । ९ क. ख. विगते । १० क. ख. तेजस्तु जिः समाख्यातः सूरिभिः शब्दशासने । ११ ग. गूहितेऽपि ।

बन्दिवृन्दे च डः प्रोक्तो डकारश्चन्द्रमण्डले ।
डकारः शङ्करे त्रासे डकारो ध्वनिरुच्यते ॥ २१ ॥
ढकारः कीर्त्तिता ढक्का निर्गुणे च ध्वनावपि ।
णकारः कीर्त्तितो ज्ञाने निर्गुणे णः प्रकीर्त्तितः ॥ २२ ॥
णकारः प्रकटे बन्धे णुः स्तुतौ च प्रकीर्त्तितः ।
तकारः कथितश्चौरे [1]क्रोडे युद्धे च कीर्त्तितः ॥ २३ ॥
तुः स्यात् [2]पूर्वनिवृत्तौ च पूर्वस्माच्च विलक्षणे ।
अवधारणे तुकारो विकल्पार्थे तथोदितः ॥ २४ ॥
शिलोच्चये थकारः स्यात् थकारो भार उच्यते ।
[3]दं कलत्रं बुधैः प्रोक्तं दो दानेऽपि च दातरि ॥ २५ ॥
धं धने धनदे धीरे धी धीरिषुधिरुच्यते ।
धूर्धुरा कम्पने धूर्ते धश्चाऽश्ववार-चित्रयोः ॥ २६ ॥
रथाङ्गे धूः समाख्याता चिन्तायां धूः प्रकीर्त्तिता ।
नकारः कीर्त्तितो ज्ञाने नुः स्तुतौ च प्रकीर्त्तितः ॥ २७ ॥
नेता नीर्ना मनुष्ये च तरण्यां नौ प्रकीर्त्तिता ।
नो निषेधे नकारेऽपि निःश्रुतेऽपि प्रकीर्त्तितः ॥ २८ ॥
नौ निषेधे नकारेऽपि नौ तथाप्यावयोस्तु नौ ।
अस्मानऽस्माकमस्मभ्यमित्यस्मिन् नः प्रकीर्त्तितः ॥ २९ ॥
[5]पकारः पवने प्रोक्तः पा स्तुतौ पा च पातरि ।
पकारो वर्णके प्रौढे पकारः प्रकटे पथि ॥ ३० ॥
फम्फावाते फकारः स्यात् तथा [6]निर्ष्फलभाषणे ।
पुष्करेऽपि फकारः स्यात् फकारो भयरक्षणे ॥ ३१ ॥

---

१ ग. क्रोडे पक्षे च युद्धके । २ ख. सर्वनिवृत्तौ । ३ ख. बुद्धिदा च । ४ ग. धूमे । ५ ग. पकारः पवमाने स्यात् पावने नैव (चैत्र) पातरि । ६ ग. स्थाने च कीर्त्तितः । फूत्कारेऽपि च फः प्रोक्तस्तथा निष्फलभाषणे ।

प्रचेता बः समाख्यातः कलहे ब उदाहृतः ।
पक्षी च बिर्निगदितो गगनं बिस्तथोदितम् ॥ ३२ ॥
नक्षत्रं भं बुधाः प्राहुर्भ्रमरे भः प्रकीर्त्तितः ।
दीप्तिर्भा [1]भूर्भवेद् भूमिर्भीर्भयं कथितं बुधैः ॥ ३३ ॥
मः शिवश्चन्द्रमा वेधा मा च लक्ष्मीः प्रकीर्त्तिता ।
मा तु मातरि माने च बन्धने मुः प्रकीर्त्तितः ॥ ३४ ॥
मे ममार्थे निषेधे मा मामित्यत्र प्रकीर्त्तितः ।
[2]यमो यः कथितः शिष्टै[3]र्यो धातरि च सम्मतः ॥ ३५ ॥
या नियन्तरि या लक्ष्मीः कथिता शब्दकोविदैः ।
रश्च रामेऽनले [4]वज्रे शब्दे रश्च प्रकीर्त्तितः ॥ ३६ ॥
धने रा आश्रये ख्यातो रुर्भये रक्षणेऽपि च ।
[5]इन्द्रेऽपि लवने चैव लू[6]र्लाऽऽदाने प्रकीर्त्तितः ॥ ३७ ॥
दिशश्चापि लवश्चैव लकारश्चामृते स्मृतः ।
ले श्लेषणे समाख्यातः शब्दशासनकोविदैः ॥ ३८ ॥
सान्त्वने वरुणे वाते वकारः सम्प्रकीर्त्तितः ।
वा वितर्के विकल्पे च युष्माकं वः प्रकीर्त्तितः ॥ ३९ ॥
युष्मभ्यं च तथा युष्मान् वां युवयोश्च कीर्त्तितः ।
[7]पक्षिणि गगने चैव विश्च प्रोक्तो मनीषिभिः ॥ ४० ॥
ब्रुवन्ति शं बुधाः श्रेयः शान्ते शा च निगद्यते ।
शीश्चापि शयने प्रोक्ता हिंसायां शुर्निगद्यते ॥ ४१ ॥
षकारः कीर्त्तितः [8]श्लेष्मा षू च गर्भविमोचने ।
सदारः षः समाख्यातः सा च लक्ष्मीः प्रकीर्त्तिता ॥ ४२ ॥

---

१ क. ख. भश्च भूर्भूमिर्भीर्भयं । २ ग. यशो । ३ ग. ०ष्टैर्यो धाता च वायुरित्यपि । ४ ग. वह्नौ शठे रुश्च प्रकीर्त्तितः । ५ ग. लं याने लवने लुः स्याल्लो दाने च प्रकीर्त्तितः । ६ ख. लूर्लविच्छेदयोः स्मृतौ । ७ ख. विहङ्गे । ८ ख. श्रेष्ठे ।

सः परोक्षे च कामे च सः कोपे वारुणे स्मृतः ।
सः सूर्येऽपि समाख्यातः सं सम्यक् परिकीर्त्तितम् ॥ ४३ ॥

हः कोपवाची रणे हस्तथा शूले निगद्यते ।
हिः स्याद्धेतौ वि[1]तरणे तथा हिरवधारणे ॥ ४४ ॥

हे तु सम्बोधने प्रोक्तो है हा चेति [तु] कष्टयोः ।
हुं प्रश्ने चाथ होमे च हं परब्रह्मलक्षणम् ॥ ४५ ॥

हो निपाते च बोधे हो हस्ते दारुणि शूलिनि ।
क्षः क्षेत्रे राक्षसे चापि क्षिः क्षये सम्प्रकीर्त्तितः ॥ ४६ ॥

इति वाररुचं प्रोक्तं यो वेत्त्येनं निघण्टुकम् ।
वा[2]गर्णवे यथाकामं तस्य स्वा[3]न्तं प्रवर्त्तते ॥ ४७ ॥

इति वररुचिविद्वत्कृता एकाक्षरनाममाला समाप्ता [११] ॥

---

१ ख. च दृष्टान्ते । ग. विवरणे । २ ख. गणयेच्च यथा कामं ख्यातिस्तस्य प्रवर्द्धते । ३ ग. स्वातन्त्र्यं वर्त्तते ।

[१२] पुरुषोत्तमदेवप्रणीतः एकाक्षरकोषः ।

अकारो वासुदेवः स्यादाकारस्तु पितामहः ।
पूजायामपि माङ्गल्ये आकारः परिकीर्त्तितः ॥ १ ॥
इकार उच्यते कामो लक्ष्मीरीकार उच्यते ।
उकारः शङ्करः प्रोक्त ऊकारश्चापि [1]लक्षणे ॥ २ ॥
रक्षणे चापि ऊकार ऊकारो ब्रह्मणि स्मृतः ।
ऋकारो देवमाता स्याद् ॠकारो दनुजप्रसूः ॥ ३ ॥
[2]ऌकारो देवजातीनां माता सद्भिः प्रकीर्त्तिता ।
ॡकारः स्मर्यते पूर्वैर्जननी शब्दकोविदैः ॥ ४ ॥
एकार उच्यते विष्णुरैकारः स्यान्महेश्वरः ।
ओकारस्तु भवेद् ब्रह्मा औकारो[3]ऽनन्त उच्यते ॥ ५ ॥
अं स्याच्च परमं ब्रह्म अः [4]स्याच्चैव महेश्वरः ।
कः प्रजापतिरुद्दिष्टो कोऽर्क-वाय्वनलेषु च ॥ ६ ॥
कश्चाऽत्मनि मयूरे च कः प्रकाश उदाहृतः ।
कं शिरो जलमाख्यातं कं सुखं च प्रकीर्त्तितम् ॥ ७ ॥
पृथिव्यां कुः समाख्यातः कुः[5] शब्देऽपि प्रकीर्त्तितः ।
खमिन्द्रिये खमाकाशे खः स्वर्गेऽपि प्रकीर्त्तितः ॥ ८ ॥
[6]सामान्ये च तथा शून्ये खशब्दः परिकीर्त्तितः ।
गो[7] गणेशः समुद्दिष्टो गन्धर्वो गः प्रकीर्त्तितः ॥ ९ ॥
गं गीतं गा च गाथा स्याद् गौश्च धेनुः सरस्वती ।
घा[8] घण्टाऽथ समाख्याता घो घनश्च प्रकीर्त्तितः ॥ १० ॥

---

१ ख. ग. रक्षणे । २ ग. ऌकारो देवयोनिः स्याद् । ३ ग. रो रुद्र उ । ४ ग. स्यादेवो । ५ ख. ग. कुत्सायां कुः प्रकीर्त्तितः । ६ ग. खं सर्पे च प्रकीर्त्तितं तथा श्वभ्रे च खं प्राहुः । ७ ख. ग. गो गणपतिरुद्दिष्टो । ८ ग. घो घण्टायां समाख्यातः किङ्किणी घा प्रकीर्त्तिता ।

घण्टीशे हनने घर्मे घुर्घोणा घूर्ध्वनावपि ।
ङकारो भैरवः ख्यातो ङकारो विषयस्पृहा ॥ ११ ॥

चश्चन्द्रमाः समाख्यातो भास्करे तस्करे मतः ।
निर्मलं छं समाख्यातं तरले[1] छः प्रकीर्त्तितः ॥ १२ ॥

छेदके छः समाख्यातो विद्वद्भिः शब्दकोविदैः ।
जं[2]कारो गायने प्रोक्तो जयने जः प्रकीर्त्तितः ॥ १३ ॥

जेता जश्च प्रकथितः सूरिभिः शब्दशासने ।
र[3]वो झकारः कथितो नष्टे झश्चोच्यते बुधैः ॥ १४ ॥

झकारश्च तथा वायौ नेपथ्ये समुदाहृतः ।
ञकारो गायने प्रोक्तो ञकारो झर्झरध्वनौ ॥ १५ ॥

टो धरित्र्यां च करके टो ध्वनौ च प्रकीर्त्तितः ।
ठकारो जनतायां स्यात् ठो ध्वनौ च शठेऽपि च ॥ १६ ॥

ठो महेशः समाख्यातः ठश्च शून्ये प्रकीर्त्तितः ।
बृहद्ध्वनौ च ठः प्रोक्तस्तथा चन्द्रस्य मण्डले ॥ १७ ॥

डकारः शङ्करे त्रासे ध्वनौ भीमे निरुच्यते ।
ढकारः कीर्त्तिता ढक्का निर्गुणे निर्धने मतः ॥ १८ ॥

णकारः सूकरे ज्ञाने निश्चये निर्णयेऽपि च ।
तकारः कीर्त्तितश्चौरे क्रोडपुच्छे प्रकीर्त्तितः ॥ १९ ॥

शिलोच्चये थकारः स्यात् थकारो भ[4]यरक्षणे ।
दं[5]कारोऽभ्रे कलत्रे च छेदे दाने च दातरि ॥ २० ॥

धं धने सधने धः स्याद् विधातरि मनावपि ।
धिषणा धीः समाख्याता धूश्चैव भार-वित्तयोः ॥ २१ ॥

---

१ ख. ग. तरणी । २ ख. ग. वेगिते जः समाख्यातो । ३ ग. झञ्झावाते झंकारः स्यान्नष्टे । ४ क. नयरक्षणे । ५ ख. ग. दं कलत्रं समाख्यातः दो दान-च्छेद-दातृषु ।

नेता[१] नश्च समाख्यातस्तरणौ नः प्रकीर्त्तितः ।
नकारः सौगते बुद्धौ स्तुतौ नस्तु प्रकीर्त्तितः ॥ २२ ॥

नशब्दः स्वागते बन्धौ वृक्षे सूर्ये च कीर्त्तितः ।
पः कुबेरः समाख्यातः पश्चिमे च प्रकीर्त्तितः ॥ २३ ॥

पवने पः समाख्यातः पः स्यात् पाने च पातरि ।
कफे वाते फकारः स्यात् तथाऽऽह्वाने प्रकीर्त्तितः ॥ २४ ॥

फूत्कारेऽपि च फः प्रोक्तस्तथा निष्फलभाषणे ।
बकारो वरुणः प्रोक्तः कलशे बः फलेऽपि च ॥ २५ ॥

वक्षःस्थले च बः प्रोक्तो गदायां समुदाहृतः ।
नक्षत्रे भं बुधाः प्राहुर्भवने[२] भः प्रकीर्त्तितः ॥ २६ ॥

दीप्तिर्भा स्याच्च भूर्भूमिर्भी भयं कथितं बुधैः ।
मः शिवश्चन्द्रमा वेधा मा लक्ष्मीश्च प्रकीर्त्तिता ॥ २७ ॥

मा च मातरि माने च बन्धने मँ[३]ः प्रकीर्त्तितः ।
यशो यः कथितः प्राज्ञैर्यो वायुरिति शब्दितः ॥ २८ ॥

याने यातरि यस्त्यागे कथितः शब्दवेदिभिः ।
रश्च रौमे[४]ऽनिले वह्नौ भूमावपि धनेऽपि च ॥ २९ ॥

इन्द्रियेन्धने[५]रोधे च रुर्भये च प्रकीर्त्तितः ।
लो दीप्तौ द्यां लश्च भूमौ भये चाऽऽह्लादनेऽपि च ॥ ३० ॥

लो वाते लवणे च स्याल्लो दाने च प्रकीर्त्तितः ।
लः श्लेषे चाशये चैव प्रलये साधनेऽपि लः ॥ ३१ ॥

मानसे वरुणे चैव वकारः सान्त्वनेऽपि च ।
विश्च पक्षी निगदितो गगनं परिकीर्त्तितम् ॥ ३२ ॥

---

१ ख. ग. नेता नीश्च समाख्यातस्तरणौ नौ प्रकीर्त्तितः । २ ख. ग. भ्रमरे । ३ ख. ग. मूः । ४ ख. ग. कामेऽनिले । ५ क. घ. नरोगे ।

शं सुखं शङ्करः श्रेयः शश्च सीम्नि निगद्यते ।
शयने शः समाख्यातो हिंसायां शो निगद्यते ॥ ३३ ॥

षः कीर्त्तितो बुधैः श्रेष्ठे षश्च[1] गम्भीरलोचने ।
उपसर्गे परोक्षे च षकारः परिकीर्त्तितः ॥ ३४ ॥

सः कोपे वरणे सः स्यात्तथा शूलिनि कीर्त्तितः ।
सा च लक्ष्मीर्बुधैः प्रोक्ता गौरी सा च स ईश्वरः ॥ ३५ ॥

हः कोपे वारणे[2] हश्च तथा शूली प्रकीर्त्तितः ।
हिः पद्यावरणे प्रोक्तो हिः स्याद्धेत्ववधारणे ॥ ३६ ॥

क्षः क्षेत्रे वक्षसि[3] प्रोक्तो बुधैः क्षः शब्दशासने ।
क्षिः क्षेत्रे क्षत्ररक्षे च नृसिंहे च प्रकीर्त्तितः ॥ ३७ ॥

आगमेभ्योऽभिधानेभ्यो धातुभ्यः शब्दशासनात् ।
एवमेकाक्षरं नामाभिधानं क्रियते मया ॥ ३८ ॥

॥ इत्येकाक्षरकोषः समाप्तः [१२] ॥

---

१ ख. ग. षूश्च गर्भमोचने । २ ख. ग. धारणे । ३ ख. ग. रक्षसि ।

[१३] अमरचन्द्रकविविरचिता
एकाक्षरनाममालिका ।

विश्वाभिधानकोशानि प्रविलोक्य प्रभाष्यते ।
अमरेण कवीन्द्रेणैकाक्षरनाममालिका ॥ १ ॥
अः कृष्णः आः स्वयम्भूरिः काम ईः श्रीरुरीश्वरः ।
ऊः रक्षणमृ ॠ ज्ञेये देव-दानवमातरौ ॥ २ ॥
ऌर्देवसूॡर्वाराही भवेदेर्विष्णुरैः शिवः ।
ओर्वेधा औरनन्तः स्यादं ब्रह्म परमः शिवः ॥ ३ ॥
को ब्रह्मा-ऽऽत्म-प्रकाशा-ऽर्क-केकि-वायु-यमा-ऽग्निषु ।
कं शीर्षेऽप्सु सुखे कुस्तु भूमौ शब्दे च किं पुनः ॥ ४ ॥
स्यात् क्षेप-निन्दयोः प्रश्ने वितर्के च खमिन्द्रिये ।
स्वर्गे व्योम्नि नृपे शून्ये सुखे संविदि खो रवौ ॥ ५ ॥
गस्तु गातरि गन्धर्वे गं गीते गौर्विनायके ।
स्वर्गे दिशि पशौ रश्मौ वज्रे भूमाविषौ गिरि ॥ ६ ॥
जलेऽक्षिण घस्तु घण्टीशे घा किङ्किण्यां वधे ध्वनौ ।
ङस्तु भैरव-विषयेच्छयोश्चश्चन्द्र-चौरयोः ॥ ७ ॥
छः सूर्ये छेदके छं तु निर्मले जस्तु जेतरि ।
विगते जूर्नभोवाचि पिशाच्यां जवने[१]ऽपि च ॥ ८ ॥
झो नष्टे चारुवायौ ञो गायने घर्घरध्वनौ ।
टं पृथिव्यां करङ्के च टो ध्वनौ ठो महेश्वरे ॥ ९ ॥
शून्ये बृहद्ध्वनौ चन्द्रमण्डले डः शिवे ध्वनौ ।
जापे ढो निर्गुणे शब्दे ढक्कायां णस्तु निष्फले ॥ १० ॥
ज्ञाने तस्तस्कर-क्रोडपुच्छयोस्ता पुनः श्रियाम् ।
थो भीत्राणे महीध्रे दं पत्न्यां दा दातृ-दानयोः ॥ ११ ॥

---

१ ख. ग. जननेऽपि ।

छेदे बन्धे च धा गुह्यकेशे[1] धातरि धीर्मतौ ।
धूर्भार-कम्प-चिन्तासु नः पुनर्बन्ध-बुद्धयोः[2] ॥ १२ ॥
निस्तु नेतरि नुः स्तुत्यां नौस्तर्यां पस्तु पातरि ।
पवने जलपाने च फो झञ्झानिल-फेनयोः ॥ १३ ॥
फूस्तु फूत्कारे निष्फलभाषणे बः प्रचेतसि ।
कलशे बिः खा-ऽण्डजयोर्भमुडौ भोऽलि-शुक्रयोः ॥ १४ ॥
भा कान्तौ भूर्भुवि स्थाने भीर्भये मः शिवे विधौ ।
चन्द्रे शिरसि मा माने श्री-मात्रोर्वारणेऽव्ययम् ॥ १५ ॥
मूः पुनर्बन्धने यस्तु मातरिश्वनि यं पशौ ।
या तु यातरि खट्वाङ्गे याने लक्ष्म्यां च रो ध्वनौ ॥ १६ ॥
तीक्ष्णे वैश्वानरे कामे राः स्वर्णे जलदे धने ।
री भ्रमे रुर्भये सूर्ये ल इन्द्रे चलनेऽपि च ॥ १७ ॥
लूर्लवे[3] लीः पुनः श्लेषे वलये वो महेश्वरे ।
वैरुणे[4] मारुते च स्यादौपम्ये पुनरव्ययम् ॥ १८ ॥
शं शुभे शा च साम्नायां शी शयने शुर्निशाकरे ।
षः श्रेष्ठे षूः पुनर्गर्भविमोक्षे सः परोक्षके ॥ १९ ॥
सा लक्ष्म्यां हो निपाते च हस्ते दारुणि शूलिनि ।
क्षः क्षेत्रे रक्षसीत्युक्ता माला प्राक्सूरिसम्मता ॥ २० ॥
पूर्वाचार्यैस्तु ग्रथिता शोध्या सद्गुणशालिभिः ।
नाम्नामेकार्थ-नानार्थैकाक्षराणामियं मया ॥ २१ ॥

इति पण्डितअमरचन्द्रकृता एकाक्षरनाममाला समाप्ता [१३]

❀

---

१ ग. गुह्ये केशे । २ ख. पुनर्बन्धु-बुद्धयोः । ३ ख. ग. लिर्लवे । ४ ख. वः पश्चिमदिगीशे स्या ।

[१४] धरसेनाचार्यविरचित एकाक्षरीनानार्थकाण्डः ।

को ब्रह्मा-ऽनिल-सूर्या-ऽग्नि-यमा-ऽऽत्म-द्योत-बर्हिषु ।
कं सुखे वारि शीर्षे च कुः शब्दे ना भुवि स्त्रियाम् ॥ १ ॥
कु निन्दायामीषदर्थे किल्बिषे वारणेऽपि च (ऽव्ययम्) ।
खमाकाशे दिवि सुखे बुद्धौ संवेदने पुरे ॥ २ ॥
शून्यवदिन्द्रिय-क्षेत्रे कुशा-हलफले क्वचित् ।
गो गन्धर्वे गणेशेऽर्के गं गीते शास्त्रगातरि ॥ ३ ॥
गौ पुमान् वृषभे स्वर्गे खण्ड-वज्र-हिमांशुषु ।
स्त्री गवि भूमि-दिग्-नेत्र-वाग्-बाण-सलिले स्त्रियः ॥ ४ ॥
घो [1]घण्टीशे च घा घाते किङ्किण्यां स्त्री ध्वनौ तु घः ।
भैरवे विषये ङः स्याच्चस्तु तस्कर-चन्द्रयोः ॥ ५ ॥
छश्छेदका-ऽर्कयोश्छा च छिदि छं लाञ्छना-ऽच्छयोः ।
जः [2]स्याज्जयिनि जोद्भूतौ [3]जीविते नरि जिर्भुजि ॥ ६ ॥
जूराकाशे सरस्वत्यां पिशाच्यां [4]जयने त्रिषु ।
[5]झकारश्चारुवायौ स्यान्नष्टेऽपि क्वचिदिष्यते ॥ ७ ॥
ञकारस्तु क्वचित् ख्यातो गायने घर्घरध्वनौ ।
ज्ञः पण्डिते बुधे वेधस्यज्ञो मूढे जडे त्रिषु ॥ ८ ॥
टा पृथिव्यां ध्वनौ टः स्यात् करङ्के टं नपुंसकम् ।
ठश्चन्द्रे मण्डले [6]शून्येऽजे करेणूच्चशब्दिते ॥ ९ ॥
डकारः पार्वतीनाथे चासे शब्देऽपि दृश्यते ।
स्याद् ढकारस्तु ढक्कायां निर्गुणे विषमध्वनौ ॥ १० ॥
णकारो निर्णये ज्ञाने शूकरेऽपि प्रकीर्त्तितः ।
पालने पालके तः स्यात् तुश्चौर-क्रोडपुच्छयोः ॥ ११ ॥

---

१ ख. घण्टायां । २ ख. स्याज्जविनि । ३ ख. जयने जिः प्रकीर्त्तितः । ४ ख. जविने । ५ ख. रस्त्वारवायौ । ६ ख. शून्ये स्यात् ।

थः स्याच्छिलोच्चये भीतत्राणे थं मङ्गुलेऽपि[1] थम् ।
दः शुद्धौ देवने दास्तु दातरि च्छेद-दानयोः ॥ १२ ॥
धो धने च धनेशे च धास्तु धातरि धीमतौ ।
नौस्तु[2] नेतरि नावि स्त्री नकारो जिन-पूज्ययोः ॥ १३ ॥
नुः स्तोतरि नुतौ स्त्री च स्यान्नेत्रमञ्जनं च नम् ।
पो वाते पा तु पाने स्यात् पास्तु पातरि वाच्यवत् ॥ १४ ॥
फु मन्त्रे फे रुते सङ्ख्ये स्फा वृद्धौ फेरवे पुमान् ।
फः स्याज्झञ्झानिले पुंसि स्फूः स्फुटे फुल्ल-भाषयोः ॥ १५ ॥
बं प्रचेतसि पुंसि स्यादुपमाने तदव्ययम् ।
भा स्यान्मयूखे शुक्रेऽपि पुंसि पुष्पन्धये तु भः ॥ १६ ॥
दीप्तौ च स्थानमात्रे भा भं नक्षत्रे भये तु भी ।
मः शिवे पुंसि मश्चन्द्रे मो विधौ मा तु मातरि ॥ १७ ॥
स्त्रियां स्यान्मा रमायां च मा क्षेपे मान-बन्धयोः ।
मा निषेधेऽव्ययं मे च ममेत्यर्थे ममाऽव्ययम् ॥ १८ ॥
यो वात-यशसोः पुंसि या यान-त्याग-यातृषु ।
रस्तु कामानले वह्नौ तीक्ष्णे रास्त्वर्थ-रुक्मयोः ॥ १९ ॥
रुर्ना शब्दे भये भागे रीः श्रोतरि भुवि स्त्रियाम् ।
क्रेतरि क्रीः क्रये तु स्त्री घ्रा घ्राणे घ्रातरि स्मृतः ॥ २० ॥
द्रुर्वृक्षेऽपि द्रुमेऽपि(?) स्याद् द्रुः स्वर्णे कामरूपिणि ।
श्रीर्लक्ष्मी-भारती-शोभा-प्रभासु सरलद्रुमे[3] ॥ २१ ॥
वेश-त्रिवर्गसम्पत्तौ वेषोपकरणे[4] मतौ ।
स्रुः स्रवे निर्झरे चाथ ह्री व्रीडे लज्जिते त्रिषु ॥ २२ ॥
ल इन्द्रे ला तु दाने स्यादाऽऽश्लेषेऽपि लयेऽपि च ।
अपि लूश्छेदके पुंसि लवने लूरपि स्मृता ॥ २३ ॥

---

१ ख. मङ्गलेऽपि । २ ख. नास्तु । ३ क. सरलद्रुवौ । ४ ख. शेषोपकरणे ।

वः कुम्भे वरुणे व स्यादिवार्थे सान्त्वनेऽव्ययम् ।
वा वात-तातयोर्ग्रन्थौ विः खगा-ऽऽकाशयोः पुमान् ॥ २४ ॥
स्वो ज्ञातावात्मनि स्वं तु त्रिष्वात्मीये धनेऽस्त्रियाम् ।
शः शतायुषि हिंसायां शं धर्मे शा तु मातरि ॥ २५ ॥
शी स्त्रीषु स्वे-परस्त्रीषु शीः स्यात् सदन-निद्रयोः ।
षकारस्तु मतः श्रेष्ठेऽपि स्याद् गर्भविमोचने ॥ २६ ॥
सा पुंस्यन्धौ रमायां स्याद् रत्यां से श्री-श्रुतेऽपि सः ।
सोरच्युते तु पार्वत्यामंसः स्कन्ध-विभूषयोः ॥ २७ ॥
सरोषवारणे हीरे हः स्यादीशात्मजे तु हिः ।
राक्षसे क्षेत्रमात्रेऽपि क्षकारः परिकीर्त्तितः ॥ २८ ॥
अः श्रीकण्ठेऽव्ययं तुल्या-ऽभावयोराः पितामहे ।
सन्तापे च प्रकोपे च भवेदाः स्मृतमव्ययम् ॥ २९ ॥
इस्तु कामे पुमान् खेदे रुषोक्तौ चाव्ययं भवेत् ।
ई लक्ष्म्यामव्ययं त्वी स्याद् दुःखभावन-कोपयोः ॥ ३० ॥
उः शिवे नाऽव्ययं तु स्यात् सम्बुद्धौ रोषभाषणे ।
ऊः स्यादनव्ययं रक्षा-ऽऽरक्ष-सूत्रिषु रक्षके ॥ ३१ ॥
ऋर्देवमातरि स्त्री स्यादव्ययं वाक्य-कुत्सयोः ।
ॠश्च स्त्री देवताम्बायां स्यादेः पुंसि चतुर्भुजे ॥ ३२ ॥
स्मृति-सम्बोधना-ऽऽह्वानेऽव्ययमैस्तु शिवे पुमान् ।
अव्ययं त्वै समाख्यातं स्मृत्या-ऽऽमन्त्रणा-ऽऽहूतिषु ॥ ३३ ॥
ओः पुमान् ब्रह्मणि ख्यातोऽव्ययमाऽऽमन्त्रणा-ऽऽह्वयोः ।
और्नभस्यव्ययं तु स्यात् सम्बुद्धा-ऽऽह्वानयोर्मतम् ॥ ३४ ॥
परब्रह्मण्यनुमतावं स्यादश्च तथाऽव्ययम् ।
अः पुंसि शङ्करे ख्यातः कथितः शब्दवेदिभिः ॥ ३५ ॥

इति एकाक्षरीनानार्थकाण्डः समाप्तः [१४]

[विश्वलोचनकोशः]

❀

---

१ क. स्वपुरी स्त्री तु ।

[१५] महीपसचिवकृत एकाक्षरसंज्ञः काण्डः ।

या संस्मृता प्राणभृतां क्षणेन
संसाधयेदिष्टसमस्तसिद्धिम् ।
विश्वस्य सृष्टि-स्थिति-नाशहेतुः
सा भारती यच्छतु वाञ्छितं वः ॥ १ ॥

कवीन्द्रकुमुदानन्दकन्दोद्गमसुधाकरः[1] ।
विरच्यते चतुष्काण्ड्या रम्योऽनेकार्थसङ्ग्रहः ॥ २ ॥

मुख्योऽत्र शब्दः प्रथमं प्रथमालङ्कृतः[2] कृतः ।
परस्त्वर्थान्तराख्यायी सप्तम्यन्त इति स्थितिः ॥ ३ ॥

विना लिङ्गविशेषेण नाऽन्यत्र पुनरुक्तता ।
नानार्थस्यार्थबाहुल्यात् स्थितिरेकत्र न क्वचित् ॥ ४ ॥

अथाऽकारादिभिः[3] शब्दैः क्षान्तैरेकाक्षराभिधः ।
ग्रन्थेऽस्मिन् प्रथमः काण्ड आविरस्ति सविस्तरात्[4] ॥ ५ ॥

अः कृष्णे विनतासूनावा विधातरि मन्मथे ।
आ अव्ययं स्मृतौ वाक्ये स्यादाः सन्ताप-कोपयोः ॥ ६ ॥

आङ् सीमायामभिव्याप्तौ क्रियायोगेषदर्थयोः ।
इः स्मरेऽघेऽव्ययं खेदे कोपोक्ताविर्भुवि श्रियाम् ॥ ७ ॥

उः शम्भावुत् प्रकाशे स्यान्मोक्षे भावोर्द्ध्व-शक्तिषु ।
उ क्रोधे बन्धने लोभे विभागेऽव्ययमूर्गुरौ ॥ ८ ॥

पालने रक्षणे ऋः[5] स्यात् पृथिव्यां देवमातरि ।
ॠर्दैत्यमातरि[6] स्याद् ऌ देव्यां ॡस्तु लतान्तरे ॥ ९ ॥

---

१ ख. कवीन्द्रकुमुदोद्गच्छदङ्कुरङ्कुरकुक्रमात् । २ ग. स्वं युक्तालङ्कृतः । ३ ख. ग. अकाराद्यादिभिः शब्दैः क्रमादेकाक्षराभिधः । ४ ख. सविस्तरः । ५ ख. ऋः स्याद् गवि गीर्वाणमातरि । ६ ख. ॠर्दितौ स्यादजे ऌः स्याददितौ ॡर्लतान्तरे ।

वाराह्यामेर्महीध्रे च विष्णावैरद्रिजापतौ ।
ओर्धातर्य्यौरनन्ते स्याद् ब्रह्मण्यः कपालिनि ॥ १० ॥
कं सुखे सलिले शीर्षे कः स्वर्ग-स्मर-वह्निषु ।
सुहृत्-सूर्य-यमोद्द्योत-केकि-ब्रह्मा-ऽऽत्म-वायुषु ॥ ११ ॥
कु भूमौ कुत्सिते शब्दे पापीयसि निवारणे ।
ईषदर्थेऽथ किं प्रश्ने वितर्का-ऽऽश्चर्ययोरपि ॥ १२ ॥
कुत्सना-ऽऽक्षेप-निन्दासु किं कियत्यपि दृश्यते ।
खं सैन्ये[1] गगने बिन्दाविन्द्रिये चन्द्रमण्डले ॥ १३ ॥
वर्ण-खण्ड-सुख-स्वर्ग-शून्य-संवित्सु खो रवौ ।
गं गीते गस्तु गन्धर्वे गणनायक-गीतयोः ॥ १४ ॥
गौर्वज्रेऽप्सु वृषे धेनौ वाचि दिग्-बाणयोर्गिरि ।
भू-मयूख-मुख-स्वर्ग[2]-सैन्य-वह्न्यक्षि-मातृषु ॥ १५ ॥
गीस्तु वाचि सरस्वत्यां दुर्गायां ककुभि स्मृता ।
घो घटे हनने रुद्रे घा किङ्किण्यां घनस्वने ॥ १६ ॥
ङशब्दो विषये भीमे चश्चन्द्रे तस्करे तरौ ।
चाऽव्ययं तु समाहारे पादपूर्त्तौ समुच्चये ॥ १७ ॥
परस्परार्थे साकल्ये कारणेऽवधृतावपि ।
पक्षान्तरे समाने स्यात् चुश्चकोरे चतुष्पथे ॥ १८ ॥
छः सूर्ये छेदके चारे छं तु छन्दसि निर्मले ।
जो जिष्णौ[3] विगते जीवे जूशब्दोऽम्बरै[4]वाचि च ॥ १९ ॥
पिशाच्यां जेवने[5] कीटे झो नष्टे चारुमारुते ।
ज्ञः स्याद् विचक्षणे चन्द्रपुत्रे मुनि[6]-विरिञ्चयोः ॥ २० ॥

---

१ ख. ग. नृपे । २ ख. ग. स्वर्ग-सत्य-व । ३ ग. विष्णौ । ४ ग. रवाच्चिषु ।
५ ग. यदने । ६ ग. मुनि-विरञ्चयोः ।

[1]ञः शब्दो गायने गूढरूपके घर्घरध्वनौ ।
टः शब्दे पवने भूमौ करङ्के टू[2] जले भुवि ॥ २१ ॥
ठो घटे सुस्वने रुद्रे चन्द्रमण्डल-शून्ययोः ।
डो ध्वनौ गिरिशे जापे ढोऽगुणे ध्वनि-ढक्कयोः ॥ २२ ॥
णो मोक्षे निष्फले स्पष्टे तः क्रोडे चौर-पुच्छयोः ।
युद्धे च ता मही-लक्ष्म्योः त्वक् च चर्मणि वल्कले ॥ २३ ॥
त्विट् प्रभायां च[3] कुत्सायां व्यवसाये रुचौ गिरि ।
तृट् तृष्णे च मता विड्ढिः पिपासा-लिप्सयोरपि ॥ २४ ॥
तु स्मृतौ च समाहारे साकल्ये कारणेऽव्ययम् ।
थो भीत्राणे भरेऽद्रौ दं पत्न्यां दा दातृ-दानयोः ॥ २५ ॥
बन्धे विखण्डने चाथ दृक् स्याद् दर्शन-नेत्रयोः ।
द्युर्वह्नौ दिवसे द्यौस्तु नाके नभसि धं धने ॥ २६ ॥
धो धीरे धनदेऽपि स्यादश्ववारक-चित्रयोः ।
धीर्धियामिषुधौ धा च गुह्यकेशे चै धातरि ॥ २७ ॥
धूस्तु धूते भरे कम्पे रथास्ये नस्तु संविदि ।
अस्मानस्माकमस्मभ्यं स्थाने बुद्ध[5]-निबन्धयोः ॥ २८ ॥
नु स्तोत्रे[6] नु वितर्के च विकल्पेऽनुशयेऽव्ययम् ।
प्रश्नेऽथ निर्नरे भूपे निर् निश्चय-निषेधयोः ॥ २९ ॥
क्रीताद्यर्थे चये ना न नो निषेधेऽव्ययानि च ।
नौस्तरण्यां च नी नद्यां न्यग् निम्ने नीच-कात्स्न्र्ययोः ॥३०॥
पः पातरि पयःपाने प्रौढे पवन-मार्गयोः ।
पूः शरीरे पुरे चाथ फो झञ्झानिल-फेनयोः ॥ ३१ ॥

---

१ क. ञः पुनर्गा । २ ख. ग. टं पुनर्गवि । ३ ग. जिगीषायां । ४ ख. स्वयंभुवि । ५ ग. निर्बन्ध-बुद्धयोः । ६ ख. ग. स्तुतौ ।

फूः फूत्कृतौ[1] च वातूले बः पद्मे वरुणे घटे ।
बिद् प्रवेशे नरे वैश्ये बाग् भारत्यां वचस्यपि ॥ ३२ ॥

बः शम्भौ वरुणे बा च स्यादौपम्ये गणेऽव्ययम् ।
बिः खगे खेऽपि भं धिष्ण्ये मेषादौ भोऽलि-शुक्रयोः ॥ ३३ ॥

भाः प्रभावे मयूखे भूरुत्पत्ति-स्थिति-भूमिषु ।
भीर्भये मो विधौ[2] चन्द्रे शिवे शिरसि मा श्रियाम् ॥ ३४ ॥

माने मातरि माशब्दो निषेधार्थेऽव्ययं स्मृतौ ।
मूशब्दस्तु ग्रहे[3] बन्धे मास् तु मासे निशाकरे ॥ ३५ ॥

यो वेधसि यमे वाते यमम्भसि पशावपि ।
या यातर्यपि खट्वाङ्गे लक्ष्म्यां यानेऽथ रः स्मरे ॥ ३६ ॥

तीव्रे वैश्वानरे शब्दे रामे वज्रे नरेऽथ राः ।
कनके विभवे मेघे स्थानके रुस्तु रक्षणे ॥ ३७ ॥

भये[4] दिनाधिपे शब्दे रीर्भ्रमे[5] रुक् प्रभेच्छयोः ।
मयूखे[6] रुज् व्यथायां च रे हूतावव्ययं स्मृतौ ॥ ३८ ॥

ला दाने लूस्तु लवने ल इन्द्रे चलनेऽमृते ।
लिर्लवे लीर्द्रवे श्लेषे कङ्कणे दृढबन्धने ॥ ३९ ॥

श्रीः प्रभा-भारती-लक्ष्मी-सम्पत्सु सरलद्रवे ।
शं सुखे स्याच्च कल्याणे शीः शये शुर्विधौ[7] सति ॥ ४० ॥

षू प्रसूतौ च षः श्रेष्ठे सः परोक्षेऽथ सा श्रियाम् ।
सत् शोभने प्रशस्ते स्याद् विद्यमाने च सज्जने ॥ ४१ ॥

सत्य-पूजितयोश्चाथ स्वः स्वर्ग-परलोकयोः ।
स्वो ज्ञातावात्मनि स्वं तु निजेऽर्थे हः शिवे करे ॥ ४२ ॥

---

१ ग. फूत्कारे । २ ख. विभौ । ३ ग. गृहे । ४ ख. ग. मीतौ । ५ क. रीर्गते । ६ ख. ग. किरणे । ७ ख. ग. शुः सुधाकरे ।

वीरे भयङ्करे हः स्यात् सम्बुद्धौ पादपूरणे ।
हा शुग्-दुःख-विषादेषु ही विषादेऽपि विस्मये ॥ ४३ ॥
दुःखहेतौ च हुं स्वप्ने परिप्रश्न-वितर्कयोः ।
हि हेतौ पादपूर्त्तौ च विशेषेऽप्यवधारणे ॥ ४४ ॥
हे हूतावपि सम्बुद्धौ हं खेदे रोषभाषणे ।
[1]संस्मृतावव्ययं चाथ क्षः क्षेत्रे रक्षसि [2]क्षमे ॥ ४५ ॥

श्रीमत्सोमभवः सलक्षसचिवो वाक्कण्ठभूषाङ्कभृत्,
सम्प्रासूत सुतं महीपममलं सौभाग्यदेवी च यम् ।
तत्सृष्टेति मुदे विदामनुपमे नानार्थनामालये,
ग्रन्थेऽस्मिन् प्रथमः पृथौ समभवत् काण्डोऽयमेकाक्षरः ॥ ४६ ॥

॥ इति सचिवश्रीमहीपकृतौ महीपकोशस्यानेकार्थतिलके
एकाक्षरसंज्ञः प्रथमः काण्डः ॥ [१५]

---

१ ख. अव्ययाः क्ष्मा भुवि ज्यायां । २ ख. समे ।

[१६] अज्ञातविद्वत्कृत एकाक्षरकोशः ॥

कः प्रजापतिरुद्दिष्टः को वायुरिति शब्दितः ।
कश्चाऽऽत्माऽपि समाख्यातः कः प्रकाश उदाहृतः ॥ १ ॥

कं शिरो जलमाख्यातं कं सुखं च प्रकीर्त्तितम् ।
कुः पृथिवी समाख्याता कुशब्दः कुत्सितेऽपि च ॥ २ ॥

खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ।
तथा सुखेऽपि खं प्रोक्तं खं शून्येऽपि तथोदितम् ॥ ३ ॥

गो गणपतिरुद्दिष्टो गन्धर्वो गौर्वसुन्धरा ।
गं च गीतेऽपि गो मात्य (माता) गौश्च धेनुः सरस्वती ॥ ४ ॥

घो घण्टीशः समाख्यातः किङ्कणी घा प्रकीर्त्तिता ।
घन(घश्च) मेघः समाख्यातस्तथा घो घर्घरस्वने ॥ ५ ॥

ङकारो भैरवः ख्यातो ङकारो विषये स्मृतः ।
चन्द्रमाश्चः समाख्यातस्तस्करश्च उदाहृतः ॥ ६ ॥

निर्मलं छं समाख्यातं तरलं छु प्रकीर्त्तितम् ।
छेदने छः समाख्यातो विद्वद्भिः शब्दवेदिभिः ॥ ७ ॥

वेगिते जः समाख्यातो जनने जिः प्रकीर्त्तितः ।
जो जेता च समाख्यातः सूरिभिः शब्दशासने ॥ ८ ॥

चारुवाद्ये झकारः स्यान्नष्टे झः समुदाहृतः ।
झञ्झावायुर्झकारः स्याद् ञकारो घर्घरस्वरे ॥ ९ ॥

टा पृथिव्यां करङ्के टो टो ध्वाने च प्रकीर्त्तितः ।
ठो महेश्वर आख्यातस्तथा शून्ये प्रकीर्त्तितः ॥ १० ॥

बृहद्ध्वनिश्च ठः प्रोक्तस्तथा चन्द्रस्य मण्डले ।
डकारः सङ्गरे त्रासे डकारो ध्वनिरुच्यते ॥ ११ ॥

ढकारः कीर्त्तिता ढक्का निर्गुणे च ध्वनावपि ।
णकारो निर्णये ज्ञाने शूकरेऽपि प्रकीर्त्तितः ॥ १२ ॥
तकारः कथितश्चौरः क्रोडपुच्छे प्रकीर्त्तितः ।
शिलोच्चये थकारः स्यात् थकारो भयरक्षणे ॥ १३ ॥
दं कलत्रं बुधैः प्रोक्तं दान-च्छेदन-दातृषु ।
धं धने च धनेशे च धा च धर्मरतिर्मता ॥ १४ ॥
सम्पत्तौ च तथा धः स्यात् तथैव यक्ष-चन्द्रयोः ।
नकारः सुगते बन्धेऽनुगतौ परिकीर्त्तितः ॥ १५ ॥
पः कुबेरः समाख्यातः पश्चिमे च प्रकीर्त्तितः ।
पवने पः समाख्यातः पा स्यात् पाने च पातरि ॥ १६ ॥
फूत्कारेऽपि च फः प्रोक्तस्तथा निष्फलभाषणे ।
वरुणे बः समाख्यातः कलशे ब उदाहृतः ॥ १७ ॥
पक्षिचञ्चू(?ञ्चौ) निगदितो गगनं बि प्रकीर्त्तितम् ।
नक्षत्रं भं बुधाः प्राहुर्भ्रमरे भः प्रकीर्त्तितः ॥ १८ ॥
दीप्तिर्भा भूश्च भूमिश्च भीर्भयं समुदाहृतम् ।
मः शिवश्चन्द्रमा वेधा मा च लक्ष्मीः प्रकीर्त्तिता ॥ १९ ॥
मार्गे माताऽभिमाने च बन्धने मूः प्रकीर्त्तितः ।
[[1] .... ॥ २० ॥
.... ।
.... ॥ २१ ॥]
.... ।
वदन्ति शं बुधाः श्रेयः शास्तु शास्ता निगद्यते ॥ २२ ॥
शी [च] शयनमित्याहुर्हिंसा शु च निगद्यते ।
षश्च संकीर्त्तितः श्लेष्मा षु च गर्भविमोचने ॥ २३ ॥

---

१ अत्र 'य-र-ल-व' इत्येकाक्षरार्थद्योतकाः श्लोका गलिताः सम्भाव्यन्ते ॥

सः परोक्षः समाख्यातः सा च लक्ष्मीर्निगद्यते ।
सः कोपे वारणे हः स्यात् तथा शूलिनि कीर्त्तितः ॥ २४ ॥

क्षेत्रे वपुषि क्षः प्रोक्तः प्रवदन्ति मनीषिणः ।
अः केशवे निषेधे च आकारश्च पितामहः ॥ २५ ॥

अत्यर्थवाचि मण्डन्यां आशब्दः परिकीर्त्तितः ।
इकार उच्यते कामो लक्ष्मीरीकार इष्यते ॥ २६ ॥

उकारः शङ्करः प्रोक्त ऊकारश्चैव रक्षणे ।
ऋकारो देवमाता स्याद् ॠकारो दनुजप्रसूः ॥ २७ ॥

ऌकारो देवयोनीनां माता सद्भिः प्रकीर्त्तिता ।
एकारो विष्णुराख्यात ऐकारः स्यान्महेश्वरः ॥ २८ ॥

ओकारस्तु भवेद् ब्रह्मा औकारोऽनन्त उच्यते ।
अं चापि स्यात् परंब्रह्म अः स्याच्चैव महेश्वरः ॥ २९ ॥

॥ इति अज्ञातविद्वत्कृत एकाक्षरकोशः समाप्तः ॥ [१६]

[१७] महाराजशाहराजकृता एकाक्षरनाममाला ।

को वायु-शमना-ऽर्केषु ब्रह्मण्यात्मनि पावके ।
सर्वनाम्नि मयूरे च सुख-शीर्ष-जलेषु कम् ॥ १ ॥
खमिन्द्रिये व्योम्नि पुरे शर्मणि त्रिदशालये ।
क्षेत्रे संवेदने बिन्दौ शून्येऽपि च निगद्यते ॥ २ ॥
गौः स्वर्गे च बलीवर्दे कुलिशे किरणे पुमान् ।
स्त्री सौरभेयी-दृग्-बाण-दिग्-वाग्-भूष्वप्सु भूम्नि च ॥ ३ ॥
घो घण्टासु समाख्यातः किङ्कणीषु समीरितः ।
दुस्तरे घर्घरे घोषेऽप्यन्तर्धाने घटेऽपि च ॥ ४ ॥
घोऽश्वमेधे समाख्यातो दानवे घुर्निगद्यते ।
अथार्थे वाक्यविस्तारे प्रसङ्गे पादपूरणे ॥ ५ ॥
समया(स्य)ने बले शेषे चशब्दः परिपठ्यते ।
चश्चन्द्रमाः समाख्यातस्तरणिश्चापि कीर्त्तितः ॥ ६ ॥
चश्चौरे समरे ख्यातः परौ च परिपठ्यते ।
निर्मले छः समाख्यातः सरणिश्छः प्रकीर्त्तितः ॥ ७ ॥
जूराकाशे सरस्वत्यां पिशाच्यां जवने स्त्रियाम् ।
ज्ञो ब्रह्म-बुध-विद्वत्सु श्री [[१]............... ॥ ८ ॥
... . ।
.... ॥ ९ ॥
.... ।
...............] ठः शून्ये प्रकीर्त्तितः ॥ १० ॥
डः पुमान् वाडवाग्नौ स्याड्डाकिन्यामपि च स्त्रियाम् ।
महाबुद्धे तु तः प्रोक्तस्तु विकल्पेऽवधारणे ॥ ११ ॥
कथ्यते ता सटायां तु योगिनां गोविदां वरैः ।
थं रक्षणे मङ्गले च साध्वसे च नपुंसकम् ॥ १२ ॥

---

१ अत्र झ-ञ-ट अक्षरार्थद्योतकः पाठस्त्रुटितो ज्ञायते ।

शिलोच्चये पुमानेव क्वचिच्च भयरक्षके ।
दुःशब्दो दुष्टवचनो दुशब्दस्तु तरावपि ॥ १३ ॥
न नो निषेधे गदितो ना नरेऽपि प्रकीर्त्तितः ।
पो वायौ च तथा पाने फो स्थूले यज्ञसाधने ॥ १४ ॥
प्रकटेऽथ रणे फः स्याद् झञ्झावाते च पुंस्ययम् ।
भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद् भृगुनन्दने ॥ १५ ॥
भूः स्थानमात्रे गदिता धरण्यामपि योषिति ।
मो यमे समये चन्द्रे विषे मा तु श्रियां स्त्रियाम् ॥ १६ ॥
मः शङ्करे च गदितो मा निषेधेऽव्ययं मतम् ।
यः सर्वनामा-ऽनिलयोर्या श्रियां ज्या तु मातरि ॥ १७ ॥
मौर्व्यां धरण्यां निर्दिष्टा द्यु स्याद् गगन-नाकयोः ।
द्यौर्व्योम्नि स्वर्गे गदिता शब्दतत्त्वार्थवेदिभिः ॥ १८ ॥
रः स्मये जलदे तीक्ष्णे वह्नौ राः स्वर्ण-वित्तयोः ।
रीर्भूमौ रुर्भये सूर्ये द्रुस्तरौ च निगद्यते ॥ १९ ॥
त्रिस्तु सङ्ख्याविशेषे स्याद् ह्रीर्लज्जायां प्रकीर्त्तिता ।
श्रीर्वेष-रचना-शोभा-भारती-सरलद्रुमे ॥ २० ॥
लक्ष्म्यां त्रिवर्गसम्पत्तौ वेषोपकरणे मतः ।
स्रुः स्रवे निर्झरे चापि द्रुः स्वर्णे कामरूपिणि ॥ २१ ॥
ल इन्द्रे लवणे व्याजे दाने ला परिकीर्त्तितः ।
ली श्लेषे चपले चापि ग्लौः [कौ] चन्द्रेऽपि गद्यते ॥ २२ ॥
वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ।
स्वं ज्ञातावात्म-धनयोरात्मीये च प्रचक्षते ॥ २३ ॥
गन्धने वं तु सन्ताने पुंसि वः पवने मतः ।
वा समुच्चय उद्दिष्टं विकल्पोत्प्रेक्षयोरपि ॥ २४ ॥

× × × [अग्रे खण्डितः] × × ×

श्रीमन्महाराजशाहराजस्य कृतौ शब्दरत्नसमन्वयकोशः [१७]

*

[१८] अज्ञातविद्वत्कृता एकाक्षरनाममाला ।

अकारं ब्रह्मदैवत्वं श्वेतं सर्ववशङ्करम् ।
सर्वज्ञत्वं मनोज्ञत्वं कामरूपत्वमम्बिके ! ॥ १ ॥
आकारं तु परा शक्तिः श्वेतमाकर्षसिद्धिदम् ।
इच्छासिद्धिं स्वात्मसिद्धिं रससिद्धिं वरानने ! ॥ २ ॥
इकारं विष्णुदैवत्वं शामरक्षाकरं भवेत् ।
रूप-कान्तिकरं श्रेष्ठं वरेण्यं मोहसिद्धिदम् ॥ ३ ॥
ईकारं दैवतं माया शाममोहकरं परम् ।
वीराणां वनितानां च वशीकारं वरानने ! ॥ ४ ॥
उकारं कालदैवत्वं शामलोकवशङ्करम् ।
मातृकोत्थापनं पुण्यं क्रूररोगविनाशनम् ॥ ५ ॥
ऊकारं पृथिवीबीजं शामरक्षाकरं परम् ।
भूत-प्रेत-पिशाचानां नाशनं रिपुनाशनम् ॥ ६ ॥
ऋकारं विधिदैवत्वं पीतं सर्वार्थसिद्धिदम् ।
चिरायुष्यं तपःसिद्धिं पराभोगं वरानने ! ॥ ७ ॥
ॠकारं शिवदैवत्वं रक्तं सर्ववशङ्करम् ।
जन्म-मृत्यु-जरा-व्याधिवर्जितं श्री-जयप्रदम् ॥ ८ ॥
अश्विनीभ्यां ऌ ॡ च स्याद् रक्तं रोगविनाशनम् ।
तीव्रसिद्धिं भिषक्सिद्धिं औषधीनां च सिद्धिदम् ॥ ९ ॥
एकारं वीरभद्राख्यं पीतं सर्वार्थसिद्धिदम् ।
निग्रहा-ऽनुग्रहकरं भीषणं जयवर्द्धनम् ॥ १० ॥
ऐंकारं भारतीविद्यास्फटिकं ज्ञानसिद्धिदम् ।
चतुःषष्टिकलासिद्धिदायकं परमं शिवे ॥ ११ ॥
ओकारं शिवदैवत्वं ज्योतिर्मयमनुग्रहम् ।
मनोवेगप्रदं श्रेष्ठं शान्तं सर्वफलप्रदम् ॥ १२ ॥
औकारं शाङ्करीविद्यास्फटिकं सर्वसिद्धिदम् ।
सारस्वतं विशेषेण शत्रूणां कोपनाशनम् ॥ १३ ॥

अंकारं बीजरुद्रं स्याद् रक्तं देववशङ्करम् ।
सर्वलोकजयं कार्यसिद्धिदं चित्तशुद्धिदम् ॥ १४ ॥
अःकारं कालरुद्रं स्याद् रक्तं पापनिकृन्तनम् ।
स्वप्रपञ्चोपसंहारं परमात्मप्रबोधकम् ॥ १५ ॥
ककारं ब्रह्मणो बीजं पीतं वृष्टिकरं परम् ।
सञ्जीवनमशेषाणां लोकानां वृद्धिदायकम् ॥ १६ ॥
खकारं जाह्नवीबीजं स्फटिकं पापनाशनम् ।
भोग-मोक्षप्रदं पुण्यं भुक्ति-मुक्तिप्रदायकम् ॥ १७ ॥
गकारं तु गणेशः स्यात् पीताभं विघ्ननाशनम् ।
पूर्वा-ऽपरस्थितिज्ञानं भूलोकविजयं शुभम् ॥ १८ ॥
घकारं भैरवं विद्याद् रक्ताभं शत्रुनाशनम् ।
महाघोरग्रहहरं सारूप्य-जयवर्द्धनम् ॥ १९ ॥
ङकारं कालबीजं स्यात् कृष्णजीवजयं परम् ।
महाभीमजगत्क्षोभ-मरणापत्तिभञ्जनम् ॥ २० ॥
चकारं भद्रकालीयं रक्ताभं शोभनं भवेत् ।
स्वेच्छाकर्षणसिद्धिः स्यात् स्वस्थावेशमयत्नतः ॥ २१ ॥
छकारं भीमकालीयं रक्ताभं वैरिनाशनम् ।
सङ्क्रमेण त्रिलोकघ्नं समरे विजयप्रदम् ॥ २२ ॥
जकारं जातवेदाख्यं सूर्य-सौदामिनीप्रभम् ।
अभिचारं महाघोरमपमृत्युभयापहम् ॥ २३ ॥
झकारमर्द्धनारीशं शामं रक्तसमाकुलम् ।
सर्वसौख्यकरं श्रेष्ठं भोग-मोक्षफलप्रदम् ॥ २४ ॥
ञकारं परमात्मीयमवाङ्मनसगोचरम् ।
सर्वज्ञानप्रदं ब्रह्मज्ञानदं श्री-जयप्रदम् ॥ २५ ॥
टकारं पृथिवीबीजं श्वेतं संहारकारकम् ।
क्रव्यादावोषधीवृद्धिपातालनिधिदर्शनम् ॥ २६ ॥

ठकारं चन्द्रबीजं स्यात् स्फटिकं शत्रुनाशनम् ।
रोग-क्ष्वेडहरं दिव्यं महाज्वरहरं परम् ॥ २७ ॥
डकारं शुक्रबीजं स्यात् पीताभं विजयं भवेत् ।
मृतसञ्जीवनं चास्य महामायावशं शिवे ॥ २८ ॥
ढंकारं वैष्णवं विद्यात् पीतं सर्वार्थसिद्धिदम् ।
बलप्रदं जलस्तम्भं पातालस्यापि दर्शनम् ॥ २९ ॥
णंकारं बलभद्रीयं श्वेतं बलविवर्धनम् ।
नित्यत्वं युद्धवीर्यत्वं रिपुदर्पविनाशनम् ॥ ३० ॥
तकारं धनदं विद्यात् पीतमैश्वर्यवर्धनम् ।
यक्ष-किन्नर-सिद्धानां वशीकारं जगद्वशम् ॥ ३१ ॥
थंकारं तु परा शक्तिः रक्तं कालजयं भवेत् ।
शान्तिदं पौष्टिकं चैव भाग्यमायुष्यवर्धनम् ॥ ३२ ॥
दकारं दुर्गाबीजं स्यात् शामं सर्वार्थसिद्धिदम् ।
निग्रहा-ऽनुग्रहकरं भोग-मोक्षैकसाधनम् ॥ ३३ ॥
धकारं धर्मबीजं स्यात् श्वेतं पुण्यविवर्धनम् ।
सर्वदेवमयं दिव्यं सर्वदर्शनदर्शकम् ॥ ३४ ॥
नकारं निर्विकल्पं स्यादप्रमेयाभमक्षरम् ।
वायुवेगं मनोवेगमिच्छारूपं भवेद् ध्रुवम् ॥ ३५ ॥
पकारमग्निबीजं स्याद् रक्तं सर्वहरक्षणम् ।
स्त्री-पुं-नपुंसकादीनां भवेदाकर्षणं शिवे ॥ ३६ ॥
फंकारं भैरवं विद्याद् रक्ताभं विजयप्रदम् ।
महाग्रहहरं सर्वज्वररोगविनाशनम् ॥ ३७ ॥
बकारमश्विनीबीजं पीतं रोगहरं परम् ।
औषधस्य महावीर्यवृद्धिदं जयवर्द्धनम् ॥ ३८ ॥
भकारं भार्गवं ज्ञेयं ज्योतिषाभमनामयम् ।
आयुरारोग्यदं श्रेष्ठमशेषश्रीविवर्द्धनम् ॥ ३९ ॥

मकारमीश्वरं विद्याज्ज्योतिरक्तं सुखावहम् ।
वश्या-ऽऽकर्षण-सन्तान-सिद्धिदानैकतत्परम् ॥ ४० ॥
यकारं वायुबीजं स्यात् कृष्णं बलविवर्धनम् ।
सर्वोच्चाटकरं क्रूरं सङ्ग्रामे जयवर्धनम् ॥ ४१ ॥
रेफं कृशानुबीजं स्याद् रक्ताभं सर्वनाशनम् ।
जङ्गमाकर्षणं युद्धे दिष्टसेनाबलं तथा ॥ ४२ ॥
लकारं शक्रबीजं स्यात् पीतं सर्वफलप्रदम् ।
अग्निस्तम्भं जलस्तम्भं स्वेच्छास्तम्भं विशेषतः ॥ ४३ ॥
वकारं वरुणं विद्यात् श्वेतं स्वेच्छाभिवृद्धिदम् ।
आकर्षणं जलध्वानमशेषज्वरनाशनम् ॥ ४४ ॥
शकारं शङ्करं विद्यात् तेजः-सौभाग्यवर्धनम् ।
अन्योन्यकलहा[द्] देववैरिणां नाशनं भवेत् ॥ ४५ ॥
षकारं द्वादशादित्यं ज्योतिरारोग्यवर्धनम् ।
शमनं सर्वरोगाणामायु-र्विद्याभिवर्धनम् ॥ ४६ ॥
सकारं भारतीबीजं श्वेतं सारस्वतप्रदम् ।
प्रतिविद्वज्जनजयं वराणां योषितां वशम् ॥ ४७ ॥
सदाशिवं हकारं स्याद् धूम्रं ज्ञानार्थसिद्धिदम् ।
अणिमाद्यष्टसिद्धिः स्याच्चतुःषष्टिकला अपि ॥ ४८ ॥
ळंकारं पृथिवीबीजं शामं सिद्धिकरं परम् ।
संहरेद् दोषराशीनामपि भूद्रव्यदर्शनम् ॥ ४९ ॥
क्षकारं श्रीनृसिंहः स्यात् स्फटिकं मोक्षसिद्धिदम् ।
रिपुगर्वहरं सर्वलोकक्षोभकरं परम् ॥ ५० ॥

इति अज्ञातविद्वत्कृता एकाक्षर[?बीज]नाममाला ॥ [१८]
[आकाशभैरवकल्पान्तर्गता]

*

[१९] मेदिनीकारकृता एकाक्षरनाममाला ।

को ब्रह्मणि समीरा-ऽऽत्म-यम-दक्षेषु भास्करे ।
कामग्रन्थौ चक्रिणि च पतत्त्रि-पार्थिवे तथा ॥ १ ॥

मयूरेऽग्नौ न पुंसि स्यात् सुख-शीर्ष-जलेषु कम् ।
खमिन्द्रिये पुरे क्षेत्रे शून्ये बिन्दौ विहायसि ॥ २ ॥

संवेदने देवलोके कर्मण्यपि नपुंसकम् ।
गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान् ॥ ३ ॥

स्त्री सौरभेयी-दृग्-बाण-दिग्-वाग्-भूष्वप्सु भूम्नि च ।
घो घण्टायां घर्घरे ना स्त्रियां तु काञ्चि-घातयोः ॥ ४ ॥

ङः पुमान् विषये ख्यातः स्पृहायां विषयस्य च ।
चश्चण्डेशे पुमानुक्तः कच्छपे चन्द्र-चौरयोः ॥ ५ ॥

चाऽन्वाचये समाहारेऽप्यन्योन्यार्थे समुच्चये ।
पक्षान्तरे तथा पादपूरणेऽप्यवधारणे ॥ ६ ॥

छा छादने स्त्रियां ख्याता निर्मलेऽन्यवदिष्यते ।
जो ना मृत्युञ्जये जन्यां तातमात्रे जनार्दने ॥ ७ ॥

जूस्त्वरागमने प्रोक्ता सामान्यगमने स्त्रियाम् ।
जूराकाश-सरस्वत्यां पिशाच्यां जवने स्त्रियाम् ॥ ८ ॥

झो झण्टीशे सुरगुरौ दैत्यराजे ध्वनावपि ।
ञः पुमान् स्याद् बलीवर्दे शुके वाममतावपि ॥ ९ ॥

ज्ञो ब्रह्म-बुध-विद्वत्सु कथितः शब्दवेदिभिः ।
टः पुमान् वामने पादे निःस्वनेऽपि क्वचिन्मतः ॥ १० ॥

ठो मण्डले चन्द्रबिम्बे शून्ये च लोकगोचरे ।
डः पुमान् वाडवाग्नौ स्याड्डाकिन्यां स्त्री निगद्यते ॥ ११ ॥

ढो ढक्कायां पुमानुक्तः शुनि तस्य च लाङ्गुले ।
णः पुमान् बिन्दुदेवे स्याद् भूषणे गुणवर्जिते ॥ १२ ॥
पानीयनिलयेऽपीति केचिदूचुर्विपश्चितः ।
तश्चौरा-ऽमृत-पुच्छेषु क्रोडे म्लेच्छे च कुत्रचित् ॥ १३ ॥
अपुमांस्तरणे पुण्ये कथितः शब्दवेदिभिः ।
तु पादपूरणे भेदे समुच्चयेऽवधारणे ॥ १४ ॥
पक्षान्तरे नियोगे च प्रशंसायां विनिग्रहे ।
थं रक्षणे मङ्गले च साध्वसे च नपुंसकम् ॥ १५ ॥
दः पुमानचले दत्ते स्त्रियां शोधन-दानयोः ।
छेदोपताप-रक्षासु पुमांस्तु दातरि स्मृतः ॥ १६ ॥
धो ना धर्मे कुबेरे च क्लीबं तु वसुनि स्मृतम् ।
धो धा च ब्रह्मणि ख्यातो धा तु स्याद्धारकेऽपि च ॥ १७ ॥
धीर्ज्ञाने ज्ञानभेदेऽपि धूः स्मृता धूनने स्त्रियाम् ।
नः पुमान् सुगते बन्धे द्विरण्डे प्रस्तुतेऽपि च ॥ १८ ॥
न स्यान्निषेधोपमयोर्निर्निवेश-भृशार्थयोः ।
नित्यार्थ-संशय-क्षेप-कीश-लोप-रमेषु च ॥ १९ ॥
सामीप्या-ऽऽश्रय-दानेषु मोक्षा-ऽन्त-भवबन्धने ।
राश्यधोभावविन्यासे नु वितर्का-ऽपमानयोः ॥ २० ॥
विकल्पा-ऽनुनया-ऽतीते प्रश्ने हेत्वपदेशयोः ।
पो ना वाता-ऽण्ड-पूतेषु पाने पातरि कीर्त्तितः ॥ २१ ॥
स्त्रियां तु रक्षणे पाने पूते पूरितके च सः ।
फो यज्ञसाधने स्फाने झञ्झावाते च पुंस्ययम् ॥ २२ ॥
फं रूक्षोक्तौ फूत्कारे च तथा निष्फलभाषणे ।
बः पुमान् वरुणे सिन्धौ भगे तोये गतेऽपि च ॥ २३ ॥

गन्धने तन्तुसन्ताने पुंस्येव वपने स्मृतः ।
भं नक्षत्रे गभस्तौ स्त्री पुंसि स्याद् भृगुनन्दने ॥ २४ ॥

भूः स्थानमात्रे कथिता धरण्यामपि योषिति ।
मो यमे समयेऽपि स्याद् विषे च मधुसूदने ॥ २५ ॥

मा स्त्री पद्मालयायां स्यात् पुंलिङ्गश्चन्द्रशेखरे ।
मा वारणे विकल्पे च स्माऽतीते पादपूरणे ॥ २६ ॥

यो ना वायौ यमने या यात्रा-ऽऽप्ति-धूमित-त्यागेषु ।
वारण-योग-समज्ञा-यानेषु पुमांस्तु गन्तरि ख्यातः ॥ २७ ॥

ज्या मातरि वसुधायां मौर्व्यां द्यु क्लीबमह्नि गगने च ।
ना ज्वलने द्यौस्त्रिदशालय-त्रिदशवर्त्मनोर्योषित् ॥ २८ ॥

रः स्मृतः पावके तीक्ष्णे रा पुंसि स्वर्ण-वित्तयोः ।
श्रीर्वेश-रचना-शोभा-भारती-सरलद्रुमे ॥ २९ ॥

लक्ष्म्यां त्रिवर्ग-सम्पत्ति-वि[?वि]धोपकरणेषु च ।
विभूतौ च मतौ च स्त्री स्रुः स्त्रियां निर्झरे स्रवे ॥ ३० ॥

लः शक्रे ला तु दाने स्याद् ग्रहणेऽपि निगद्यते ।
ली श्लेषणे च चपले ग्लौ धरण्यां निशापतौ ॥ ३१ ॥

वः सान्त्वने च वाते च वरुणे च निगद्यते ।
वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ॥ ३२ ॥

वा स्याद् विकल्पोपमयोर्वितर्के पादपूरणे ।
समुच्चये च विस्रम्भे नानार्था-ऽतीतयोरपि ॥ ३३ ॥

वै स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि च ।
वि निग्रहे नियोगे च तथैव पदपूरणे ॥ ३४ ॥

निश्चयेऽसहने हेतावव्याप्ति-विनियोगयोः ।
ईषदर्थे परिभवे शुद्धावालम्बनेऽपि च ॥ ३५ ॥

स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीये धनेऽस्त्रियाम् ।
शं वदन्ति बुधाः श्रेयः शश्च शस्त्रं निगद्यते ॥ ३६ ॥

शीश्च शयनमित्याहुः शास्त्रं शा च निगद्यते ।
षः कचे पुंसि विज्ञेयः श्रेष्ठे स्यादभिधेयवत् ॥ ३७ ॥

क्षः संवर्त्ते राक्षसे च नरसिंहे च विद्युति ।
क्षेत्रे नाशे क्षेत्रपाले क्षिर्निवासे गतौ क्षये ॥ ३८ ॥

सा जीवेच्छे पञ्चवक्त्रे भृगौ भासि निशापतौ ।
शक्तौ तु सा स्त्रियां सुस्तु प्रसवे गर्भमोचने ॥ ३९ ॥

हः शिवे सलिले शून्ये धारणे मङ्गलेऽपि च ।
गगने नकुलीशे च रक्ते नाके च वर्ण्यते ॥ ४० ॥

ह स्यात् सम्बोधने पादपूरणे च विनिग्रहे ।
नियोगे च क्षिपायां स्यात् कुत्सायामपि दृश्यते ॥ ४१ ॥

हा विषादे च शोके च कुत्सा-दुःखार्थयोरपि ।
हि पादपूरणे हेतौ विशेषेऽप्यवधारणे ॥ ४२ ॥
प्रश्ने हेत्वपदेशे च सम्भ्रमा-ऽसूययोरपि ।
ही दुःखे हेतावाख्यातो विषादे विस्मयेऽपि च ॥ ४३ ॥

हे सम्बोधन आह्वानेऽप्यसूयादौ च दृश्यते ।
है सम्बोधन आह्वाने हो हौ शब्दौ तथैतयोः ॥ ४४ ॥

अशब्दः स्यादभावेऽपि स्वल्पार्थ-प्रतिषेधयोः ।
अनुकम्पायां च तथा वासुदेवे त्वनव्ययम् ॥ ४५ ॥

आ प्रगृह्यं स्मृतौ वाक्येऽनुकम्पायां समुच्चये ।
इ खेदे च रुषोक्तौ चापाकरणा-ऽनुकम्पयोः ॥ ४६ ॥
ई विषादेऽनुकम्पायां लक्ष्म्यां पुनरनव्ययम् ।
उ सम्बोधन-रोषोक्त्योरनुकम्पा-नियोगयोः ॥ ४७ ॥

पदस्य पूरणे पादपूरणेऽपि च दृश्यते ।
ऊ वाक्या-ऽऽरम्भ-रक्षा-ऽनुकम्पास्वपि च दृश्यते ॥ ४८ ॥
ऋशब्दो गर्हणे वाक्ये देवाम्बायां त्वनव्ययम् ।
ॠ वाक्यारम्भे रक्षायां वक्षः-स्मृत्योरनव्ययम् ॥ ४९ ॥
देवाम्बायां दनौ चापि भैरवे दनुजे गतौ ।
ऌकारो देवताम्बायां भुवि कुध्रे च कीर्त्तितः ॥ ५० ॥
ॡकारो देवनार्यां स्यान्नार्यात्मन्यपि मातरि ।
ए स्मृतावप्यसूया-ऽनुकम्पा-ऽऽमन्त्रण-हूतिषु ॥ ५१ ॥
ऐशब्दो दृश्यते हूतौ स्मृत्या-ऽऽमन्त्रणयोरपि ।
ओ सम्बोधन आह्वाने स्मरणे चानुकम्पने ॥ ५२ ॥
औशब्दः कथितो हूतौ तथा सम्बोधनेऽपि च ।
स्त्री तु विश्वम्भरायां स्यात् पुमांस्तु निःस्वने स्मृतः ॥ ५३ ॥

इति मेदिनीकारकृता एकाक्षरनाममाला ॥ [१९]

[मेदिनीकोशान्तर्गता]

[२०] एकाक्षरीमातृकाकोशः ।

श्रीगणेशं महेशानं भारतीमीश्वरं शिवम् ।
नत्वा वक्ष्ये मातृकाणां निघण्टं बालबुद्धये ॥ १ ॥

ॐ. ध्रुवस्तारस्त्रिवृद् ब्रह्म वेदादिस्तारकोऽव्ययः ।
प्रणवश्च त्रिमात्रोऽपि ॐकारो ज्योतिरादितः ॥ २ ॥

अ. श्रीकण्ठः केशवश्चापि निवृत्तिश्च स्वरादिकः ।
अकारो मात्रि(तृ)काद्यश्च वात इत्यभिधीयते ॥ ३ ॥

आ. नारायणस्तथाऽनन्तो मुरवृत्तो गुरुस्तथा ।
विष्णुः(ष्णु)शय्या तथा शेषो दीर्घ आकार एव च ॥ ४ ॥

इ. माधवः सूक्ष्मः(क्ष्म)संज्ञश्च विद्या दक्षिणलोचनम् ।
गन्धर्वः पाञ्चजन्यश्च इकारश्चमुकाङ्कुरः ॥ ५ ॥

ई. गोविन्दश्च त्रिमूर्त्तीशः शान्तिः स्याद् वामलोचनम् ।
नृसिंहास्त्रं तथा माया ईकारोऽपि सुरेश्वरः ॥ ६ ॥

उ. अमरेशस्तथा विष्णुरिन्धिका च गजाङ्कुशः ।
दक्षकर्णश्च विजयी उकारो मन्मथाधिपः ॥ ७ ॥

ऊ. अर्वीशो(उर्वीशो) दीपिका वामश्रवणं मधुसूदनः ।
इन्द्रचापः षण्मुखश्च ऊकारो रक्षणाधिपः ॥ ८ ॥

ऋ. देविका दक्षनाशा च भारभूतिस्त्रिविक्रमः ।
देवमाता रिपुघ्नश्च ऋकारस्तापनस्तथा ॥ ९ ॥

ॠ. अतिथीशो वामनश्च मोचिका वामनासिका ।
दैत्यमाता च दैवज्ञ ॠकारस्त्रिपुरान्तकः ॥ १० ॥

ऌ. श्रीधरश्च परास्थाणुर्दक्षगण्डस्त्रिवेदकः ।
एकाङ्घ्रिर्वज्रदण्डश्च व्योमर्द्धिर्ऌ स्वरः स्मृतः ॥ ११ ॥

ॡ. हृषीकेशो हरः सूक्ष्मो वामगण्डः कुबेरदृक् ।
अर्द्धर्चो नीलचरणी ॡकारश्च त्रिकूटकः ॥ १२ ॥

ए. झण्टीशः पद्मनाभश्च शक्तिः सूक्ष्मामृता भगः ।
ऊर्ध्वोष्ठगः कामरूप एकारश्च त्रिकोणकः ॥ १३ ॥

ऐ. ज्ञानामृतो भौतिकश्चाधरो दामोदरस्तथा ।
वागीशो वर्म भयद ऐकारस्त्रिपुरस्तथा ॥ १४ ॥

ओ. सद्योजातो वासुदेव ऊर्ध्वदन्तस्त्रिमात्रकः ।
आप्यायनीमन्त्रनाथ ओकारो नागसंज्ञकः ॥ १५ ॥

औ. सङ्कर्षणी[1] तु ग्रहेशो मुरारिर्व्यापिनी तथा ।
अधौदन्तगतो मायी नृसिंहाङ्गस्तथौ [2]स्वरः ॥ १६ ॥

अं. अक्रूरो व्योमरूपश्च प्रद्युम्नश्चन्द्रसंज्ञकः ।
अनुस्वारस्तथा बिन्दुरङ्कारश्च शिरोऽव्ययः ॥ १७ ॥

अः. अनन्तश्च महासेनोऽनिरुद्धो रसवर्णकः ।
कन्यास्तननिभः सर्गो विसर्गश्चान्तिमस्वरः ॥ १८ ॥

क. क्रोधीशो धातृसंज्ञश्च चक्री सृष्टिः करादिगः ।
वर्गादिर्गैः[3] पादवेषः ककारः कामगः स्मृतः ॥ १९ ॥

ख. क्रुधर्द्धि-गदि-चण्डीशाः खेटो दक्षिणकूर्परः ।
कैटभारिश्च मातङ्गः संहारः खार्णकः स्मृतः ॥ २० ॥

ग. स्मृतिः पञ्चान्तकः शार्ङ्गी गणेशो मणिबन्धगः ।
गोमुखो गजकुम्भश्च गकारः सिंहसंज्ञकः ॥ २१ ॥

घ. खड्गी शिवोत्तमो मेधा दक्षिणाङ्गुलिमूलगः ।
घनो घनस्वरश्चैव घकारो ङादिमः स्मृतः ॥ २२ ॥

---

१ ख. ०र्षणोऽनुग्रहेशो । २ क. रसः । ३ ख. ०दि यादवेशः स्यात् ककारः ।
४ ख. ०ङ्गुलगः परः ।

ङ. शङ्खाङ्को[1] रुद्रकान्तिश्च दक्षाङ्गुल्यग्रसंस्थितः ।
क्लीबवक्त्रश्च भद्रेशो ङकारश्चानुनासिकः ॥ २३ ॥

च. हली कूर्मेश्वरो लक्ष्मीर्वामबाह्वादिगस्तथा ।
चित्रधारी चञ्चलश्च चकारः संस्मृतो बुधैः ॥ २४ ॥

छ. एकनेत्रश्च मुशली वामकूर्परगोद्युतिः ।
त्रिबिन्दुकस्तथा[2] चारी छकारः श्लेष्मकाभिधः ॥ २५ ॥

ज. स्थिराजपद्मोजपजः शूली च चतुराननः ।
मणिबन्धगतो वामे जकारो[3] जनकोत्तमः ॥ २६ ॥

झ. स्थितिः पाशी तथाऽजेशो वामाङ्गुलितलस्थितिः[4] ।
स्वस्तिकः स्थाणुसंज्ञश्च झकारो जान्तसंज्ञकः ॥ २७ ॥

ञ. वामाङ्गुल्यग्रगः सिद्धिरङ्कुशी शर्वसंज्ञकः ।
झान्तगो[5] ह्यनुनासश्च ञकारश्च निरञ्जनः ॥ २८ ॥

ट. जरा मुकुन्दः सोमेशो दक्षपादादिगोमुखः ।
गजाङ्कुशश्च बालेन्दुरमृताद्यष्टकः स्मृतः ॥ २९ ॥

ठ. लाङ्गलीशो नन्दजश्च पालिनी च कमण्डलुः ।
दक्षजानुगतः स्थायी ठकारः स्थविरः स्मृतः ॥ ३० ॥

ड. नन्दी क्षान्तिर्दारकश्च डामरो दक्षगुल्फगः ।
व्याघ्रपादः शुभाङ्घ्रिश्च डकारस्तोमरो मतः ॥ ३१ ॥

ढ. ऐश्वरी चार्द्धनारीशो नरः शाखान्तराकृतिः ।
दक्षपादाङ्गुलीमूलो ढलो ढक्को ढकारकः ॥ ३२ ॥

---

१ क. संज्ञाको । २ क. त्रिबुन्दक । ३ क. ञ्कारोऽञ्जनको० । ४ ख. स्थितः ।
५ क. मातङ्गो ह्यनुगानश्च ।

ण. उमाकान्तो नरकजिद् रतिर्दक्षपदाग्रगः ।
निर्वाणस्त्रिगुणाकारस्त्रिरेखो णः समीरितः ॥ ३३ ॥

त. वामोरूमूलनिलय आषाढी कामिका हरिः ।
तीव्रश्च तरलो नीलस्तकारः कीर्त्तितो[1] बुधैः ॥ ३४ ॥

थ. दण्डीशो वरदः कृष्णो वामजानुगतः स्मरः ।
शौरी चापि विशालाक्षः थकारः परिकीर्त्तितः ॥ ३५ ॥

द. सत्योऽत्रीशो ह्लादिनी च वामगुल्फगतस्तथा ।
शूली कुबेरो दाता च दकारो धादिमः स्मृतः ॥ ३६ ॥

ध. मीनेशः सात्वतः प्रीतिर्वामपादाङ्गुलीगतः ।
धनेशो धरणीशश्च धकारो दान्तिमः स्मृतः ॥ ३७ ॥

न. शौरी मेषेश्वरी दीर्घा वामपादाग्रसंस्थितः[2] ।
नरो नदीनो नादी च नकारश्चानुनासिकः ॥ ३८ ॥

प. तीक्ष्णश्च लोहितः शूरो दक्षपार्श्वश्च पार्थिवः ।
पद्मेशो नान्तिमः फादिः पकारोऽपि प्रकीर्त्तितः ॥ ३९ ॥

फ. [3]जनार्दनः शिखी रौद्री वामपार्श्वकृतालयः ।
फट्कारः प्रोच्यते सद्भिः फकारः पान्तिमः स्मृतः ॥४०॥

ब. छलगण्डो भूधरश्च भयपृष्ठगतस्तथा ।
सुरसो वज्रमुष्टिश्च बकारो भादिमो मतः ॥ ४१ ॥

भ. विश्वमूर्त्तिर्द्विरण्डेशो निद्रा नाभिगतोऽपि च ।
भ्रकुटी च भरद्वाजो भकारश्च [4]जयावहः ॥ ४२ ॥

म. वैकुण्ठश्च महाकालस्तन्द्री जठरसंस्थितः ।
मन्त्रेशो मण्डलो मानी विषः सूर्यो मकारकः ॥ ४३ ॥

---

१ ख. कीर्यते । २ ख. दाङ्गुलीगतः । ३ क. जनार्दनी । ४ क. जयापहः ।

य. क्षुधा बाला च वायुस्त्वग्[1] हृद्गतः पुरुषोत्तमः ।
यमुनो यामुनेयश्च यकारो मान्तिमः स्मृतः ॥ ४४ ॥

र. क्रोधिनी च भुजङ्गेशी ज्वाली रुधिर-पावकौ ।
रोचिष्मान् दक्षिणांशश्च रुचिरो रेफ ईरितः ॥ ४५ ॥

ल. क्रिया ककुद्गतो मांसं पिनाकी भूर्बलानुजः ।
लम्पटः शक्रसंज्ञश्च वाद्यो रान्तो लकारकः ॥ ४६ ॥

व. वालो वामांसनिलयो मेदो वारिद-वारुणौ ।
[2]उत्कारी जलसंज्ञश्च खड्गीशोऽपि वकारकः ॥ ४७ ॥

श. मृत्युर्बको वृषघ्नश्च हृदो दक्षकरस्थि[3]तिः ।
शङ्कुकर्णोऽस्थिसंज्ञश्च शकारो विद्भिरीरितः ॥ ४८ ॥

ष. वृषः श्वेतेश्वरः पीता मज्जा हृद् वामबाहुगः ।
षडाननः षकारश्च कीर्त्ति[4]तश्च बुधैः खरः ॥ ४९ ॥

स. भृगुः श्वेतस्तथा हंसो हृदो दक्षिणपादगः ।
समयः सामगः शुक्रः सङ्गतिः सार्णकः शशी ॥ ५० ॥

ह. नभो वराहो नकुलो हृदो वामपदस्थितः ।
सदाशिवोऽरुणप्राणो हकारश्च हयाननः ॥ ५१ ॥

ळ. हृदयान्नाभिसंस्थानः शिवेशो विमलोऽसितः ।
लघुप्रयत्नश्चोपान्त्यो ल(ळ)कारः प्रोच्यते बुधैः ॥ ५२ ॥

क्ष. संवर्त्तको नृसिंहश्च हृदयान्मुखसंस्थितः ।
अनन्तः परमात्मा च वज्रकायोऽन्तिमाक्षरः ॥ ५३ ॥

इति हादिमते [5]मातृकाकोशः समाप्तः ॥

---

१ क. ग्, घृतश्च पुरु । २ ख. उत्कारो जल । ३ ख. स्थितः । ४ ख. कीर्तितोऽपि ।
५ ख. तन्त्रकोशः ।

[२१] अजिरादि-एकाक्षरी नाममाला

अजिरे कथितोऽकारो हरि-हर-कमठ-[1]प्रजापतीज्यासु ।
गौरीगोरवकारणचरणरणन्नूपुराभरणे ॥ १ ॥

सुखविततौ परितापे स्यादिह आकार आपकुम्भे च ।
[2]चिरेविस्मृतसंस्मरणे लघुसम्मतसर्वगे भावे ॥ २ ॥

कुसुमशरे गिरिकुहरे शशधरकिरणे करेणुक-क्षौद्रे ।
भुजगफणामणिरोचिषि पठित इकारस्तु हीकारे ॥ ३ ॥

ईकारः कमलायां कमलदले कमलकेसरे भुजगे ।
गिरिशिखरे गिरिवारुणि सुरपतिचापे च रचनायाम् ॥ ४ ॥

तरुशिखरे [3]गिरिमौलौ गौरीहृदये च निगदित उकारः ।
[4]शशधररोचिषि शुचेरपि (? शुचिनि च) [5]शुक्ले पक्षेऽत्रपे नेत्रे ॥५॥

ऊकारो [6]रजनीकृति पुरुषे [7]राजन्यगवलमङ्गी च ।
प्राङ्गणमङ्गलकलशे देवे क्वचिदप्यथोन्मादे ॥ ६ ॥

विभवे महति ऋकारो रिपुसूदन्यां गजे गिरौ विवरे ।
ऋद्धिविशेषे देवे वि[8]नये योनौ सुराणां च ॥ ७ ॥

अम्बुनि चिहुरे फणिदृशि ॠकारस्तुहिन-कमल-करुणासु ।
[9]ॠयुक्ते त्रिदशेऽपि च फणिपतिबाह्वोरलङ्कारे ॥ ८ ॥

मरुदशने करिदशने दानवदशने कुलीरदशने च ।
[10]लिप्ताङ्गहृदयदेहे ऋजुर्ॡकारं सदा पठितम् ॥ ९ ॥

---

१ क. ख. ०प्रजापतीर्यासु । ग. घ. ङ. ०प्रजापतिर्यासु । २ ग. चिरविस्मृतिसंस्मरणे । ३ क. ख. गिरिमूले । ग. हरमौलौ । ४ क. ख. घ. ङ. शशधररोचिशुचिरपि । ५ क. ख. घ. शुक्लः सुक्षेत्रपे नेत्रे । ग. शुक्ले सुक्षेत्रपे नेत्रे । ६ क. ख. रजनीकृतपुरुषे । ७ क. ख. ग. राजन्यजगलमङ्गी च । ८ ग. घ. ङ. द्वितये । ९ क. ख. ऋजुरुक्ते । ग. रीयुक्ते । १० क. ख. लिप्ताङ्गहृदये देवे । ग. लिप्ताङ्गहृदयदेवे ।

[1]शक्रशरे कृकलासे [2]नीलीजातौ [3]स्वैरे च लृकारः ।
मकरे [4]शितमकरेन्द्रे नयनच्छवि-लोचनापाङ्गे ॥ १० ॥

मणिकुट्टिम-हर्म्योदर-वासरसुख-गगन-नीरधारासु ।
एकारो निशि निगदित एकादशमे [5]पशावपि च ॥ ११ ॥

ऐकारो दिग्दन्तिनि सुरपतिदन्तावले च सितपिच्छे ।
[6]ऐरावत इभभेदे पर्वतशिखरेऽपि चार्वर्थे ॥ १२ ॥

ओतौ केतौ धनदे शरा-ऽसि-जम्बाल-सरसिज-जलेषु ।
कुड्या-ऽम्बुनामदेवे विदित ओकार [7]खट्वासु ॥ १३ ॥

औकारः परमार्थे सिद्धविमाने [8]विशुद्धकार्ये च ।
औषधपाने नेमि(?) च चन्द्रकलायामुमातनये ॥ १४ ॥

अंकारः सुखवपने मन्त्रे द्राघीयसि सुनिष्कम्पे ।
[9]अञ्जन-योग-नियोगे सप्तस्वरसे[गे ?] सुगाने च ॥ १५ ॥

रविरथतुरङ्गरश्मौ अःकारः कथितः सिद्धमन्त्रे च ।
शशिमण्डले च [10]चक्रे कुर्कुटशिरसः शिखायां च ॥ १६ ॥

ब्रह्मणि शिरसि च [11]सलिलेऽनाहतशब्दे च निगदितः ककारः ।
चामीकरेऽप्युदात्ते यज्ञविधौ शुक्लवर्णे च ॥ १७ ॥

खः स्यादिह [12]खगराजो नभोगतौ निश्चये [13]तथा दीने ।
पावनमपि दन्तीनां शान्तरसे चैव उदराग्नौ ॥ १८ ॥

---

१ ङ. शक्रधरे । २ क. ख. ग. लीलाजातौ । ३ ग. घ. ङ. सरे । ४ ङ. शतसकरीन्द्रे । ५ क. ख. ग. पशोरपि । ६ ग. ईरापतिइभदेवे । घ. एरापतिइभदेवे । ङ. ऐरापतिइभदेवे । ७ क. ख. ग. घ. खट्वां च । ८ ङ. विशुद्धकार्येषु । ९ क. ख. अञ्जन-योग-नियोगे सप्तमअसुरे भुनागे च । ग. अञ्जनिनामनि योगे सप्तस्वरसे समाने च । घ. अञ्जनयाननियोगे सप्तअरसे सगाने च । १० क. ख. शुक्रे । ११ ग. घ. ०ले अनहतशब्दे । १२ ङ. नगराजो । १३ क. ख. ग. क्षमे । घ. क्षते ।

क्षितिनयने परमार्थे सुरसिद्ध्यां च इव(?) निगदितः गकारः ।
गत्याक्षेपे वस्तुनि गान्धारेऽप्यथ च वाचायाम् ॥ १९ ॥
घर्घरशब्द-पराक्रम-निदाघ-संवेग-वाद्यभूमिश्च ।
[1]विशिखश्चिगवेतस्याभोगीने(?) स्याच्च घः शब्दः ॥ २० ॥
नित्यविशेषे विरसे स्याद् दिव्ये केपये(?) [2]पैराभागे ।
विप्रकनिष्ठाङ्गुल्यां भरहररेखासु च चकारः ॥ २१ ॥
भवति प्रलापनित्ये शक्तिपरे चाम्बुदे फणिपतौ च ।
त्र्यक्षरमन्त्रविभागे छः शब्दः पारदे दाने ॥ २२ ॥
[3]योन्यामधरितशब्दे जः स्यादिह नीर[4]देऽप्यसम्बध्ये ।
कार्याधरण-महोत्सव-विस्तार-समुद्रवेलासु ॥ २३ ॥
पक्वौषध्यापाने [5]पैात्रविशेषे च निगदितः झकारः ।
पद्मासने च दर्पे भद्रोपायाप्रतापे च ॥ २४ ॥
[6]तीव्रनिनादोत्ताने ञः शब्दः [7]स्याँदले विपत्तौ च ।
दावाग्नौ [8]चापि गते उपलेप-कलाप-सीमासु ॥ २५ ॥
[9]रक्षोदर-सव्याकृति-धूमर्दास्येतनो(?) रथावर्त्ते ।
ठः शब्दः स्याद् भवने दिनकरकिरणेषु परितापे ॥ २६ ॥
भवति डकारोऽतिशये रतदुरसाविस्मये च दुर्गपथे ।
अन्दोलने च नारी (र्यां) इक्षुरसे वाम-दक्षिणयोः ॥ २७ ॥
ढः शब्दस्तु पिशाचे मूका-ऽलस-मूर्ख-मुग्ध-रोगेषु ।
सव्या-ऽपसव्ययोरपि सुभगेऽप्यधिके भगे चैव ॥ २८ ॥

---

१ ग. वैशाद्यश्चिगचेतनस्याभोगीनः स्याद् घः शब्दः । घ. वैशषश्चिगचेततस्याभोगीनः स्याद् घः शब्दः । ङ. वैशेपिस्विकचेतः स्याद् भोगीनः स्याच्च घशब्दः । २ ङ. पराभोगे । ३ क. ख. घ. योन्यामधिरितशब्दो जः । ४ क. ख. ०देऽप्यसन्धन्यः । ग. ०देऽप्यसन्धत्या । घ. ०देऽप्यसन्थव्यः । ५ ङ. पानविशेपे । ६ क. ख. तीव्रे निनादोत्ताने । ७ ङ. स्यादिले । ८ क. ग. चास्ति । ९ क. ख. रक्षोदरसिध्याकृति । घ. रक्ष्योदरसव्याकृति ।

नाशाग्नौ परिवर्त्तन-जात्यन्ध-कृकाटिकासु **ण**ः शब्दः ।
स्यादिह [1]पङ्कजपत्रे वेदनिनादे च विप्रसङ्गत्याम् ॥ २९ ॥
पश्चादर्थे-परिश्रम-वियोग-सम्भोग-तत्त्व-करुणासु ।
धातुर्वादविधावपि **त**ः स्याद् वीणादिके वाद्ये ॥ ३० ॥
ग्रहकल्लोल-सितासित-धुताधुतश्चारनालशब्देषु ।
सन्मिषया परिमार्जने[2]-कल्प-विरामेषु च **थ**कारः ॥ ३१ ॥
भवति **द**कारो दाने भावे सम्बोधने च वैराग्ये ।
द्रावकवस्तुविशेषे गृहीतमुक्तेषु च विशुद्धौ ॥ ३२ ॥
ऐरावतस्य कुम्भे आश्लेषे पावनेऽपि सामर्थ्ये ।
धन्वन्तरे [3]बिभीते **ध**ः शब्दः स्यात् कलत्रायाम् ॥ ३३ ॥
नः शब्दः प्रतिषेधे स्थिर-निश्चय-शुष्कवाद-शून्येषु ।
[4]स्यादपरपरिश्लिष्टे चर्वित-छिन्ना-ऽतिभिन्नेषु ॥ ३४ ॥
पः शब्दः स्यादमृते प्रसन्न-करभोरु-वारिधारासु ।
कौस्तुभमणिप्रकाशे सन्ततिशुभलक्षणोपेते ॥ ३५ ॥
[5]**फो**ऽविहतगतौ परोक्षे चन्द्रकलायां कलेवरे कुट्याम् ।
केकायां शुचिभक्ते [6]प्रभवेऽपाच्यां प्रतीकारे ॥ ३६ ॥
बः शब्दः स्याद् विमले बिन्दु-विसर्गे च कुवलये चैव ।
बलभद्राकर्षणनिभविकल्पबप्पीहके [7]क्षिपि च ॥ ३७ ॥
आकाश-दीप्ति-नक्षत्र-चार-दैवज्ञ-सिद्धमन्त्रे च ।
[8]अभिमतभावे भौमे **भ**ः शब्दः स्यादलङ्कारे ॥ ३८ ॥
म भवेदिह मेधायां निवारणे साक्षिसत्यवादे च ।
[9]हुतभुक्-सेनान्यङ्गज-पिङ्गलवर्णे-प्रकोष्ठेषु ॥ ३९ ॥

---

१ ङ. पङ्कजपये । २ क. ग. ०न-जल्प-वि० । ३ क. च मीते । ४ क. ग. स्यादपरे परि० । ५ घ. ङ. अवितततगतौ । ६ ङ. फो भवेत् प्राम्प्यां । ७ ग. क्षपे च । ८ घ. अभिनवभावे । ९ क. घ. हुतभुक्सेनान्यङ्गनपिङ्गलवर्णे प्रकोष्ठे च ।

शोभनअवयवनिर्माण-रूपबीभत्स[1]-अञ्जने पाके।
कल्पद्रुममञ्जर्यां भवति यकारोऽत्र पिण्डाक्षे[2] ॥ ४० ॥

लः स्याद् द्रुमशाखायां [3]ललितललितचाटुकारवचनेषु।
[4]षट्चरणे मकरेन्द्रे मधुमत्ते [5]मन्दगत्यां च ॥ ४१ ॥

वः शब्दस्तु विकल्पे स्यादिन्द्रियसंयमेषु पञ्चशरे।
तूर्ण-समुच्चय-जाग्रद-सृष्टादर-विनिर्गम-वटेषु ॥ ४२ ॥

इन्द्रधनौ वल्मीके कच्छप-नृपभक्ति-देवपूजासु।
[6]कुस्त्रीकृतेऽविदग्धे भवति शकारस्तु कमलायाम् ॥ ४३ ॥

स भवेदिह साकारे प्रभञ्जने अविचले च शकटपथे।
ध्याने सद्धर्मशून्ये देहकलायामुमातनये ॥ ४४ ॥

हः शब्दो हास्यरसे चतुर्मुखे चैव राजहंसे च।
वीणायाः क्वणितेऽपि च शोण[7]मणिरुचिषु रोमाञ्चे ॥ ४५ ॥

क्षः स्यात् क्षेपविशेषे दण्डधरे भार्गवे च भद्रायाम्।
दुःस्वप्नोपम-विग्रह[8]-निर्भय-तट-कालकूटेषु ॥ ४६ ॥

॥ इति मातृकाया उपरि एकाक्षरी नाममाला समाप्ता ॥

---

१ ग. ॰त्स. अर्जुनीपाके। २ घ. पिण्डोक्षे। ३ क. ललितश्चाटुकारवचनेषु। लालितरश्चाटुकारवचनेषु. ग. घ.। ४ क. षट्करणे। ५ च. क. घ. मण्डगत्यां च। ङ. मङ्गगत्यां च। ६ ग. कुश्रीकृतेऽपि। ङ. कुस्त्रीकृतेऽपि। ७ ग. शाके मणिरुचिषु। ८ क. ग. ॰ह-निर्भक-त॰।

[२२] नत्वादि-एकाक्षरी नाममाला

नत्वाऽब्जिनीधवं ध्यात्वा कमलाकरभारतीम् ।
अभिधानमनेकार्थमेकाक्षरमहं ब्रुवे ॥ १ ॥

ओमङ्गीकरणा-ऽऽह्वान-ब्रह्म-याचन-दीप्तिषु ।
अः सूर्या-ऽग्नीन्दु-पवन-विष्णु-नक्षत्र-शङ्करे ॥ २ ॥

आ ब्रह्मा-ऽब्ध्य-र्क-चापेषु इः कामेन्द्रा-ऽब्जसम्भवे ।
ईर्लक्ष्मी-मौलि-जिह्वासु उः शम्भू-ग्रा-ऽमरेश्वरे ॥ ३ ॥

ऊः सुधा-ऽनन्त-जलदे ऋर्देवाम्बा-रवा-ऽध्वनि ।
ॠः दैत्याम्बा-गान-दाने ऌः श्लेषा-ऽमरसू-शिवे ॥ ४ ॥

ॡः स्थिलाऽऽलिङ्गिन(नि) स्थाणावृएर्विष्णु-रवि-मारुते ।
ऐः शङ्करे ब्रह्म-भूपे ओ ब्रह्मेन्दु-सुधासु च ॥ ५ ॥

औः सुधा-ऽनन्त-जलदे अं भेदा-ऽऽत्मेश-मारुते ।
अः षडास्येन्दुचूडेन्द्रे को यमा-ऽग्नि-दिवाकरे ॥ ६ ॥

द्योता-ऽऽत्म-ब्रह्म-वातेषु शिरो-ऽम्बु-वदनेषु कम् ।
खः शून्य-खड्ग-नृपतौ शून्या-ऽऽकाशेन्द्रियेषु क(ख)म् ॥ ७ ॥

गो गातृ-गायनेभास्ये घो वाद्या-ऽम्बुधरा-ऽम्बुधौ ।
ङः पूजक-द्विज-काक्षे चः स्याद् भृत्येन्दु-तस्करे ॥ ८ ॥

छश्छन्दश्चन्द्र-तरले जो जेतृ-रवि-पन्नजे ।
झो नष्टा-ऽनिल-सङ्गेषु ञः प्राज्ञ-पट-गायने ॥ ९ ॥

टोऽर्द्धचन्द्र - रवेलासु ठः खेशेन्दुसुमण्डले ।
डः पक्षे सारवाक्षेपे ढः शब्द-गति-निर्गुणे ॥ १० ॥

णो गन्धेभा-ऽऽस्य-हर्षेषु तस्तापा-ऽमर्ष-दस्युषु ।
थो भीत्राण-गिरि-व्योम्नि दः सिंहा-ऽसि-त्रिलोचने ॥ ११ ॥

धो बाल-पितृ-वित्तेशे नो रक्षा-कवि-वारिदे ।
पः शैल-त्रन-वासेषु फः कला-ऽनिल-शाखिनि ॥ १२ ॥

बोऽम्बुभृद्-वायु-कुम्भेषु भः शुक्र-गिरि-भूपतौ ।
मः शिवा-ऽऽमा-ऽम्बु-भद्रेषु यो यान-यम-मारुते ॥ १३ ॥

रो वज्रा-ऽनल-कामेषु लो दीनेन्दु-विहङ्गमे ।
वः पाशि-रिण-वज्रेषु शोऽश्व-शूद्रा-ऽम्बु-भर्त्तरि ॥ १४ ॥

षः शून्या-ऽर्का-ऽग्नि-कीनाशौ(शे) सोऽस्त्रभुक्-सिंह-दुर्जने ।
हः कास-शूर-गमने क्षः क्षेत्रा-ऽनिल-तपासे ॥ १५ ॥

इति नत्वादि-एकाक्षरी नाममाला ॥

❀

[२३] अभिधानादि - एकाक्षरी नाममाला

अभिधानं प्रवक्ष्यामि नानाशब्दार्थविस्तरम् ।
साङ्ख्यं[1] चारु (?वार) रुचं यत्तदेकाक्षरमुदाहृतम् ॥ १ ॥

अकारो हरि-रुद्रौ च आकारश्च पितामहः ।
इकार उच्यते कामो लक्ष्मीरीकार ईष्यते[2] ॥ २ ॥

उकारः शङ्करे[3] प्रोक्त ऊकारो विष्णुरुच्यते ।
ऋकारो देवमाता स्याद् ॠकारो दनुजप्रसूः[4] ॥ ३ ॥

ऌकारो देवमाता स्यान्नागमाता तु ॡ स्मृता ।
एकार उच्यते विष्णुरैकारश्च महेश्वरः ॥ ४ ॥

ओकारस्तु भवेद् ब्रह्मा औकारोऽनन्त इष्यते ।
अं भवेत् परमं ब्रह्म अः स्याच्चैव महेश्वरः ॥ ५ ॥

कः प्रजापतिरुद्दिष्टो वायौ सूर्ये च कः स्मृतः ।
कश्चात्मनि सुखे ख्यातः कः प्रकाशमुदाहृतम् ॥ ६ ॥

कं शिरो जलमाख्यातं कं सुखे परिकीर्त्तितम् ।
कुः पृथिव्यां समाख्याता कुशब्दः कुत्सितेऽपि च ॥ ७ ॥

खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ।
स्वर्गेऽपि खं च संप्रोक्तं शून्ये खड्गेऽपि खं स्मृतम् ॥ ८ ॥

गो गणेश्वर[6] उद्दिष्टो गन्धर्वो गः प्रकीर्त्तितः ।
गश्च गीते च गाथायां गौर्धेनुश्च सरस्वती ॥ ९ ॥

घो घण्टिका समाख्याता किङ्कणी घः प्रकीर्त्तितः ।
घश्च मेघः समाख्यातो घूर्ध्वनावपि कीर्त्तितः ॥ १० ॥

---

१ सङ्ख्या विचारणा तस्या योग्यं साङ्ख्यं । २ क. ख. उच्यते । ३ ख. ग. घ. शङ्करः ४ क. ख. ग. दनुजे स्मृतः । ५ ग. घ. स्वर्गेऽपि । ६ क. ख. गो गणे घ. स्वरि दिष्टो । ७ ग. घ. घूर्दितावपि ।

ङ्कारो भैरवे प्रोक्तो ङ्कारो [1]व्यसनेऽपि च ।
ङ्कारः स्वर आख्यातस्तस्करे चाऽप्युदाहृतः ॥ ११ ॥
चश्चन्द्रमसि आख्यातस्तस्करे चाऽप्युदाहृतः ।
च शोभायां समाख्यात[2]श्चः पक्षान्तरसूचने ॥ १२ ॥
निर्मले छं समाख्यातं [3]तडिच्छः सम्प्रकीर्तितः ।
छेदने छः समाख्यातः, छश्च संवरणेऽपि च ॥ १३ ॥
वेगे तेज[4]स्यपि स्याज्जो [5]जने जश्च प्रकीर्त्तितः ।
जेता च जिः प्रविख्यातो जयने जिः प्रकीर्त्तितः ॥ १४ ॥
भैरवे तु झकारः स्यान्नष्टे च समुदाहृतः ।
झकारो बन्धने प्रोक्तो झकारो [6]घर्घरस्वरे ॥ १५ ॥
ञकारो मूढरूपे च ञकारो विषयात्मनि ।
ञकारो गायने प्रोक्तो ञकारो जर्ज्जरे स्वरे ॥ १६ ॥
टा पृथिव्यां समाख्याता करटे टं प्रकीर्त्तितम् ।
ठो महेश्वर आख्यातः, ठश्च [7]शून्ये प्रकीर्त्तितः ॥ १७ ॥
[8]बृहद्ध्वनौ च ठः प्रोक्तस्तथा ठ[9]श्चन्द्रमण्डले ।
डकारः शङ्करे प्रोक्तो डकारो ध्वनिरुच्यते ॥ १८ ॥
[10]ढः कीर्त्तितश्च ढक्कायां निगूढेऽपि ध्वनावपि ।
णकारः कीर्त्तितो ज्ञाने [11]णूँ (णु) स्तुतेऽपि प्रकीर्त्तितः ॥ १९ ॥
तकारः कथित[12]श्चौरः क्रोधे पुच्छे च कीर्त्तितः ।
शिलोच्चये थकारः स्यात् थकारो [13]भयरक्षणे ॥ २० ॥

---

१ घ. विसनेऽपि । २ घ. ंतः स्वपक्षेतरसूचकः । ३ घ. तटे छा. । ४ क. तेजसि चापि स्याज्जो जनके जः प्रकीर्त्तितः । ५ घ. जवने जः प्रकीर्त्तितः । ६ ख. ग. जर्ज्जरस्वरे । ७ क. ख. स्तने । ८ ग. घ. बृहद्ध्वने । ९ ग. चण्डमण्डले । १० ग. घ. ढकारः कीर्त्तितो ढक्का निमूढेऽपि । ११ ग. घ. ण[ः] । १२ ग. तश्चेतः क्रोधे । घ. तश्चेतः क्रोडे । १३ क. नयरक्षणे ।

दं कलत्रं बुधैः प्रोक्तं छेदे दाने च दातरि ।
बन्धने धः स्मृतौ [1]धौतौ धने धान्ये च धः स्मृतः ॥ २१ ॥
[2]धी गतिर्बुद्धिरित्याहुर्युद्धे च कम्पने तथा ।
धौते धूमे समाख्याता धूश्चैवं भार-वित्तयोः ॥ २२ ॥

नकारः कीर्त्तितो ज्ञाने निषेधेऽपि प्रकीर्त्तितः ।
नेता[3] नि[ः] श्वसने ख्यातस्तै[4]रण्यां नौः प्रकीर्त्तितः ॥ २३ ॥
पकारः पवने प्रोक्तः पाँ[5]स्तु पाने च पातरि ।
फकारोऽरण्यसंसुप्तौ फकारः प्रकटे रणे ॥ २४ ॥

झञ्झावातः फकारः स्यात् फकारो भयरक्षणे ।
[6]वंःषट्कारे फकारश्च तथा स्थाँ[7]स्नौ प्रकीर्त्तितः ॥ २५ ॥
[8]र्फः फूत्कारे च फूः प्रोक्तस्तथा निष्फलभाषणे ।
प्रवेशे बः समाख्यातः कलहेऽपि प्रकीर्त्तितः ॥ २६ ॥

नक्षत्रे भं बुधाः प्राहुर्भ्रमरे भः प्रकीर्त्तितः ।
दीप्तिर्भाऽपि च भूर्भूमिर्भीर्भयं कथितं बुधैः ॥ २७ ॥
मः [9]शिवश्चन्द्रमा वेधा मा च लक्ष्मीः प्रकीर्त्तिता ।
[10]माँ तु मातरि माने च बन्धने मूः प्रकीर्त्तितः ॥ २८ ॥
यमो यः कथितः श्रेष्ठो यो धातरि च शब्दितः ।
याने यातरि यस्त्यागे कथितः शब्दवेदिभिः ॥ २९ ॥
रश्च कामेऽनले वज्रे शब्दे रूपे च कीर्त्तितः ।
[11]राँ धने श्रवणे ख्यातो रो भये रक्षणे च रः ॥ ३० ॥

---

१ ग. धौता । घ. धाता । २ ग. घ. धा धा(धि)धी बुद्धिरित्याहुर्धूर्युगे कम्पने तथा । ३ क. ख. न च विश्वसने । ४ ख. ग. तरणे । घ. पूरणे । ५ क. ख. पस्तु । ६ क. ख. ग. फः षट्कारे फकारः स्यात् । ७ क. स्थाणौ । ८ ग. घ. फूत्कारे चापि फः । ९ ग. घ. शमश्चन्द्रमा । १० क. ख. माला । ११ क. नीराज्ञे । घ. धने रा वैश्रवे ख्यातो । ख. नारी विश्रबणे ख्यातो ।

ल इन्द्रे लवने व्याजे लश्च दाने प्रकीर्त्तितः ।
ली[१]ः श्लेषे वलये चैव लकारो नास्तिके भवेत् ॥ ३१ ॥

सान्त्वने वरुणे वा[२]ते वकारः संप्रकीर्त्तितः ।
गत्यर्थे नयने श्रेष्ठे विकारे वः प्रकीर्त्तितः ॥ ३२ ॥

पक्षिणि गगने चैव विशब्दस्तु प्रकीर्त्तितः ।
शः परोक्षे समाख्यातः शा[३]न्तौ शोभा-वरेण्ययोः ॥ ३३ ॥

ब्रुवन्ति शं[४] शिवे सुज्ञाः शं शोभायां निगद्यते ।
शीः श[५]याने च निन्दायां हिंसायां च निगद्यते ॥ ३४ ॥

षः परोक्षे समाख्यातः षा च लक्ष्मीर्निगद्यते ।
सकारः कीर्त्तितः श्रेष्ठे शूलिनि सः प्रकीर्तितः ॥ ३५ ॥

हो[६] हरे ही विचित्रे च हे च सम्बोधने तथा ।
क्षः क्षेत्रे[७] च समाख्यातः क्षः[८] क्षमायां क्षये तथा ॥ ३६ ॥

अकारादि-क्षकारान्तवर्णानां च पृथक् पृथक् ।
अभिधानं समासेन कथितं बुधसंस्तुतम् ॥ ३७ ॥

॥ अभिधानादि - एकाक्षरी नाममाला समाप्ता ॥

॥ श्रीरस्तु ॥

*

---

१ ग. ली श्लेष्मा (श्लेष्मणि) लये । घ. ली श्लेष्मणि लये । २ क. ग. वाने । ३ ग. घ. शान्ते । ४ ग. घ. शं सिताषु ज्ञाः । ५ क. ख. शयने । घ. शपने । ६ ग. घ. हे है सम्बोधने प्रोक्तौ हे है श्चैव[वे] प्रकीर्त्तितः । ७ ख. ग. घ. क्षेमे । ८ क. क्षमायां क्षा क्षमे तथा । ख. क्षी क्षमायां क्षमे तथा ।

[२४] पण्डितमनोहरकृत एकाक्षरकोशः ।

वाङ्मयीं वरदां देवीं नत्वा च शिवमव्ययम् ।
लिखाम्येकाक्षरं कोशं दिव्यज्ञानविवृद्धये ॥ १ ॥
अकारो विष्णुरुद्दिष्ट आकारश्च महेश्वरः ।
इकारः कथ्यते कामो लक्ष्मीरीकार उच्यते ॥ २ ॥
उकारः शंकरः प्रोक्त ऊकारश्चापि रक्षणे ।
ऋकारो देवमाता स्याद् ॠकारः स्वर्ग उच्यते ॥ ३ ॥
ऌकारो दैत्यमाता स्याल्लॄकारो दनुजप्रसूः ।
एकार उच्यते विष्णुः, ऐकारः स्यान्महेश्वरः ॥ ४ ॥
ओकारस्तु भवेद् ब्रह्मा औकारोऽनन्त उच्यते ।
अमिति स्यात्परं ब्रह्म अः स्याच्चैव महेश्वरः ॥ ५ ॥
कः प्रजापतिरुद्दिष्ट को वायुरितिः शब्दितः ।
क आत्मा च समाख्यातः प्रकाशे क उदाहृतः ॥ ६ ॥
कं शिरो जलमाख्यातं कं सुखं च प्रकीर्तितम् ।
पृथिवी कुः समाख्याता कुः कुत्सेति प्रकीर्तिता ॥ ७ ॥
खमिन्द्रियं समाख्यातं खमाकाशमुदाहृतम् ।
गुह्येति खं समाख्यातं खं सुखं च प्रकीर्तितम् ॥ ८ ॥
गो गणपतिरुद्दिष्टो गंधर्वे गः प्रकीर्तितः ।
गीतं गमुक्तं याता गो गौस्तु पश्वादिषु त्रिषु ॥ ९ ॥
घो घंटायां समाख्यातः किंकिण्यादौ प्रकीर्तितम् ।
हनने घा समाख्याता घुः कलौ च प्रकीर्तितः ॥ १० ॥
ङकारो भैरवे प्रोक्तो ङकारो विषयस्पृहा ।
चश्चन्द्रमा समाख्यातस्तारकाः च उदाहृताः ॥ ११ ॥
निर्मलं छं समाख्यातं तरलं छं प्रकीर्तितम् ।
छेदने छा समाख्याता विद्वद्भिः शब्दकोविदैः ॥ १२ ॥

वेगिनि जः समाख्यातो जवने जः प्रकीर्तितः ।
जेता च जः समाख्यातः सूरिभिः शब्दशासने ॥ १३ ॥

झंझावाते झकारः स्यान्नष्टे झः समुदाहृतः ।
ञकारो गायने प्रोक्तो ञकारो घर्घरध्वनौ ॥ १४ ॥

टंकारे टः पृथिव्यां टा टो ध्वनौ च प्रकीर्तितः ।
टो महेश्वर आख्यातः शून्येऽपि टः प्रकीर्तितः ॥ १५ ॥

बृहद्ध्वनौ च ठः प्रोक्तस्तथा चन्द्रस्य मण्डले ।
डकारः शंकरे जापे ध्वनौ त्राणे निगद्यते ॥ १६ ॥

ढकारः कीर्तिता ढक्का निर्णये च प्रकीर्तितः ।
णकारः कथितो ध्वाने निर्णये णः प्रकीर्तितः ॥ १७ ॥

तकारः सुगते बुद्धे क्रोडपुच्छे प्रकीर्तितः ।
शिलोच्चये थकारः स्यात् थकारो भयलक्षणे ॥ १८ ॥

दं कलत्रं बुधैः प्रोक्तं दा दाने छेदनेऽपि च ।
धं धने च धनेशेऽब्धौ धो धावति निदर्शितः ॥ १९ ॥

धिषणा धीः समाख्याता धूर्भार-चिन्तयोस्तथा ।
नकारः सुगते वृन्दे नः स्तुतौ च प्रकीर्तितः ॥ २० ॥

नीश्च नेता समाख्यातो नौकायां नौरुदाहृता ।
पूरणे पः समाख्यातः पा पाने पाश्च पातरि ॥ २१ ॥

झंझावाते फकारः स्यादक्षरेऽपि प्रकीर्तितः ।
कोपेऽपि फः समाख्यातस्तथा निष्फलभाषणे ॥ २२ ॥

प्रचेता वः समाख्यातः कलशो वः प्रकीर्तितः ।
पक्षी च विर्निगदितो गमने विः प्रकीर्तितः ॥ २३ ॥

नक्षत्रं भं बुधाः प्राहुर्भ्रमरो भः प्रकीर्तितः ।
भा दीप्तिरपि भूर्भूमिर्भीः भयं कथितो बुधैः ॥ २४ ॥

म: शिवश्चन्द्रमा वेधा मा लक्ष्मीः कथिता बुधैः ।
मा मातरि च माने च बन्धने मुः प्रकीर्तितः ॥ २५ ॥

यशो यः कथितः शिष्टैर्यो वायुरिति शब्दितः ।
याने यातरि त्यागे च यकारः कथितो बुधैः ॥ २६ ॥

रश्च कामेऽनिले वह्नौ शब्दे रुश्च प्रकीर्तितः ।
धने रा रिर्गतिः ख्याता रा दानेऽपि प्रकीर्तितः ॥ २७ ॥

ल इन्द्रे लवणे लूः स्याल्ला दाने श्लेषणेऽपि लोः ।
सांत्वने वरुणे वाते वकारश्च प्रकीर्तितः ॥ २८ ॥

वदन्ति शं बुधाः श्रेयः शं च शास्त्रं निगद्यते ।
शी शयनमिति प्राहुर्हिंसायां शूर्निगद्यते ॥ २९ ॥

षकारः कीर्तितः खड्गे षूश्च गर्भविमोचने ।
सः परोक्षे समाख्यातः सा च लक्ष्मीर्निगद्यते ॥ ३० ॥

सत्कारवारणे हुं स्यात् तथा शूलिनि कीर्तितः ।
क्षः क्षेत्रे वक्षसि प्रोक्तः क्षकारः स्याच्च शासने ॥
इत्येकाक्षरकोशश्चागात् समाप्तिं मनोहरः ॥ ३१ ॥

॥ पं. मनोहरकृत एकाक्षरकोशः समाप्तः ॥

*

[२५] कालिदासव्यासकृता एकाक्षरी नाममाला ।

नत्वा शङ्करपादपद्मयुगलं ज्ञानाय हेतोः सखे !,
नानाग्रन्थविलोकिता पुनरहं ज्ञात्वा मया लिख्यते ।
श्रीदामोदरजागरूकवसु[1]धान्तस्याऽऽत्मजो व्यासराट्,
तेनाऽयं वितनोदभूत सुवये(?)श्रीकालिदासाभिधः ॥ १ ॥

शब्दाब्धेरथ चन्द्रोऽभूत् सम्प्रकाशकरैर्नृणाम् ।
नानार्थकौमुदीं कुर्वे हृद्ध्वान्तध्वंसनाय वै ॥ २ ॥

कवीन्द्रकुमुदो गुच्छं शब्दवारिसदङ्कुरः ।
विरच्यतेऽत्र सत्काव्यं रम्यैकाक्षरसङ्ग्रहम् ॥ ३ ॥

विना लिङ्गविशेषेण नान्यत्र पुनरुक्तिता ।
नानार्थस्यार्थबाहुल्यात् स्थितिरेकत्र न क्वचित् ॥ ४ ॥

मुख्योऽत्र सङ्ग्रहः शब्दः प्रथमालङ्कृतः कृतः ।
परस्त्वर्थान्तरद्योतः सप्तम्यन्त इति स्थितः ॥ ५ ॥

अकाराद्यादिभिः शब्दैः क्रमादेकाक्षराभिधः ।
ग्रन्थेऽस्मिन् प्रथमोऽकारो विस्तरं रच्यते मया ॥ ६ ॥

अकारो ब्रह्म-विष्णवीश-कमठेष्वङ्गणे रणे ।
गोरथेऽन्तःपुरे हेतौ सूर्येऽद्रावम्बु-मान्ययोः ॥ ७ ॥

गरुडेऽवयवे चाथ पूजने प्रेरणेऽ[2]प्यजे ।
शब्देऽर्दनेऽदने चान्ने निषेधेऽनादरेऽव्यये ॥ ८ ॥

[3]सञ्जात्ये च निराकारे स्वल्पेऽर्थे ज्ञे तु पुंस्यपि ।
ब्राह्मणे शकले वायौ वह्नौ [4]वा शब्द-सोमयोः ॥ ९ ॥

विरञ्चावा पुल्लिङ्गे त्वा वाक्ये तु स्मरणेऽव्यये ।
बन्धुवर्गे तिरस्कारे क्रियायोगेषदर्थयोः ॥ १० ॥

---

१ क. धा. तस्याऽऽत्मजो । ख. ग. धान्तस्याऽऽत्मने । २ ख. ग. ऽप्यजि । ३ ख. ग. सज्ज्यात्यां । ४ ख. ग. वा सोमशब्दयोः ।

कोपे भावे पटे चित्रे दूराह्वाने पितामहे ।
मातामहे च सन्तापे मन्मथेऽथ वृथास्मृतौ ॥ ११ ॥
अभिव्यक्तावभिव्याप्तौ सीमायां दुःख-खेदयोः ।
इरहर्मणिरश्मौ तु संशये बाण-मान्ययोः ॥ १२ ॥
हारे करेणुकुक्ष्यन्ते निशाकरकरे स्मरे ।
कोपोक्तौ कामबाणे स्यात् पुंसि त्वाश्चर्य-खेदयोः ॥ १३ ॥
ईकारः कज्जले लक्ष्म्यां वाण्यां कमलकेसरे ।
रसनायां शक्रचापे बाणे बलिनि कन्धरे ॥ १४ ॥
पुल्लिङ्गेऽव्ययमीश्चैव प्रत्यक्षे दुःखभावके ।
प्रकोपे सन्निधौ चौरे नवोढायां भुवि स्वरे ॥ १५ ॥
उकारः क्षत्रिये नेत्रे हरमौलौ हरे हरौ ।
मात्रायां शेषफूत्कारे शोके सम्बुद्धिषु स्मृतः ॥ १६ ॥
रोषोक्त्या-ऽऽमन्त्रणार्थेषु मोक्ष-भावोर्द्धशक्तिषु ।
अप्रकाशे भवेत् पुंसि षण्ढेऽव्ययमुदाहृतम् ॥ १७ ॥
ऊकारः पुरुषे चन्द्रे राजपुत्रे गलेऽसुरे ।
[1]प्राङ्गणोपमयोर्नावकुम्भेऽवनिजरत्नके ॥ १८ ॥
ऊकारो बन्धने लोभे विभागे पुंसि चाव्ययम् ।
प्रश्ने चाङ्गीकृते पुंस्त्वे पुंसि रक्षण-सूर्ययोः ॥ १९ ॥
ऊमव्यये स्वरे क्लीबे रोषोक्ति-प्रश्नयोरपि ।
ऋकारः कुञ्जरे शैले धीभेदे देवमातरि ॥ २० ॥
स्वभावे देवनद्यां च सुरायां विवरे दिवि ।
अव्यये पुंसि कुत्सायां पालने रक्षणे गुरौ ॥ २१ ॥
ॠकारः कुत्सिते सर्पदृष्टौ विगतसम्पदि ।
हिम-पद्मा-ऽदिति-स्वर्ग-धन-भूषा-भुजा-ऽम्बुषु ॥ २२ ॥

---

१ क. ख. प्रकाणसमयो° ।

ॠरजे विकलाङ्गे स्याद् भगे पुंस्यवयवेऽपि च ।
ऌकारो दन्तिनां दन्ते करीर-कपिदन्तयोः ॥ २३ ॥
स्वर्गा-ऽदित्योर्लिप्तगात्रे गजे नप्तरि वक्षसि ।
ॡर्दर्पे योषिति द्रव्ये पुंसि स्यादव्ययेऽपि च ॥ २४ ॥
ॡकारः कृकलासे प्लवङ्गेऽक्षिण मकरे सुरे ।
लीलागतौ लोचनेऽस्थि नागमातरि मातरि ॥ २५ ॥
स्याद्धास्याक्ष्यां नवोढायाः कञ्चुके तु लतान्तरे ।
एकारस्तेजसि जले रात्रौ हर्म्योदरे हरौ ॥ २६ ॥
व्योम्न्येकादशसङ्ख्यायां दिनादौ मणिकुट्टिमे ।
महीन्द्रे धातरि ज्ञेये साक्षीत्वातीषयोर्हरे (?) ॥ २७ ॥
ऐकारो दिङ्मुखे पूरे हरे श्रीशिखरे त्वचि ।
ओकारः पद्म-कुट्य-ऽम्बु-श्रीद-मेघेन्दु-योनिषु ॥ २८ ॥
शक्तौ जने विरञ्चौ स्याद्वेदादौ प्रणवे द्विजे ।
अङ्गीकारे तथा[2] ॐ स्यादोँ माङ्गल्ये विशेषणे ॥ २९ ॥
ओरूर्द्ध्वलिङ्ग आहूते त्वव्ययं पुंसि कथ्यते ।
औकारस्त्वम्बिकागारे नृपाणां जय-शूरयोः ॥ ३० ॥
विशुद्धाङ्गेन्दुकलयोरनन्ते शुद्धपुष्पके ।
कुलीने यज्ञपात्रेशे स्यादौ सम्बोधनेऽव्यये ॥ ३१ ॥
अं शवे बकवाक्येऽतिदीर्घेऽञ्जलि-नियोगयोः ।
सप्तस्वरान्तमाने च परंज्योतिषि च स्मृतः ॥ ३२ ॥
अः शिवायां सिद्धमन्त्रे प्रग्रहेऽर्के रथार्वणि ।
चित्रे कुर्कुटमूर्द्धेन्दुबिम्बे ब्रह्मेश-विष्णुषु ॥ ३३ ॥

॥ इति स्वरवर्गः ॥

*

---

१ क. नान्ते नाग । २ क. तथौपम्यादौ माङ्गल्ये ।

को ब्रह्मा-ऽऽत्मा-ऽनिला-ऽर्कोऽग्नि-चित्रा-ऽरि-यम-केकिषु ।
विष्णुवाहनशब्देऽब्धौ सितकर्णे वसौ द्युतौ ॥ ३४ ॥
कलहे को विजानीयात् प्रश्नेऽर्थेऽपि कचिन्मतम् ।
स्वर्गे चक्रे तथा मित्रे शुद्धेऽर्थे स्मर-कालयोः ॥ ३५ ॥
कं शुक्रे रुधिरे मांसे फले प्रश्ने तु कन्दुके ।
कं शिरो-ऽम्बु-सुखे क्लीबे निन्दायामाननेऽव्ययम् ॥ ३६ ॥
कुर्धात्र्यां कुत्सिते शब्दे पापीयसि निवारणे ।
ईषदर्थे कलत्रे स्याद् हीनजातौ तु कुङ्कुमे ॥ ३७ ॥
किमभ्युपगमे प्रश्ने प्रस्तावा-ऽऽश्चर्ययोरपि ।
पुनरर्थे च निन्दायां रजस्याक्षेप-कुत्सयोः ॥ ३८ ॥
वितर्काश्चर्ययोः क्रोधे किलार्थेऽतिशयेऽव्ययम् ।
ईषदर्थे भवेद् व्योम्नि किः कीटे स्यात् कियानपि ॥ ३९ ॥
कि ब्रह्मण्यामपि प्रश्ने खड्गमुष्टि-कुचाग्रयोः ।
विधवाभगनिर्देशे दन्तिनां रेषणेऽपि च ॥ ४० ॥
केकिनां नर्त्तने शब्दे किं शब्देऽपि विधीयते ।
कु कुत्सिते च पीडायां कूर्म-कुत्सनयोरपि ॥ ४१ ॥
का शोभायां कुशब्दे स्यादामिषे शकलेऽपि च ।
काकानामेकदेशे स्याद् रजक्यामपि कथ्यते ॥ ४२ ॥
कां युगपदि[1] योगे च वारणेऽश्वगतावपि ।
कुं घटे कुङ्कुमे पाके सम्बोधने च को भवेत् ॥ ४३ ॥
पक्षिभेदे भवेत् कोपे कठोरे कोऽपि कथ्यते ।
कं स्तब्धनिर्जले जीवे जन्तूनां विपदि स्मृतः ॥ ४४ ॥
खमिन्द्रिये सुखे व्योम्नि नक्षत्रे क्षेत्रपालने ।
कृपा-फलकयोः शून्यबिन्दौ संवेश-रङ्कयोः ॥ ४५ ॥

---

१ ख. ग. पद्योगे ।

सूर्ये[1] वर्णे नृत्ये सत्ये वह्नौ सम्पदि संविदि ।
चन्द्रस्य मण्डले भूमौ बालायाः स्तनयोरपि ॥ ४६ ॥
गं गिरा-गात्र-गाथासु गीते स्याद् गश्च गातरि ।
गणेशेऽग्नौ च गन्धर्वे गीते स्याद् गमने तु गा ॥ ४७ ॥
गीस्तु वाण्यां सरस्वत्यां दुर्गायां ककुभौ स्मृता ।
गौर्नाके वृषभे चन्द्रे वाग्-भू-दिग्-धेनुषु स्त्रियाम् ॥ ४८ ॥
द्वयोस्तु रश्मि-दृग्-बाण-स्वर्ग-वज्रा-ऽम्बु-लोमसु ।
गणेशे मूषके सौख्ये स्तुतेश्वर्यां मदे रवौ ॥ ४९ ॥
घो घने हनने रुद्रे घोषान्तर्भाव-कुम्भयोः ।
निदाघे घटने[2] मेघे घण्टायां सुस्वने च घः ॥ ५० ॥
घं घटा-ऽमृतयोर्ना भू-वार्त्ता-घोरेषु घस्त्रिषु ।
नूपुरे घं नटांह्रौ स्याद् घा किङ्किण्यां घनस्वने ॥ ५१ ॥
ङं क्लीबमञ्जने ना तु भैरवे विषये जने ।
चश्चकोरे समाख्यातश्चुल्ल्यां कोपे चतुष्पथे ॥ ५२ ॥
दन्तिनो दन्तवलये चकारः पुनरव्ययः ।
साकल्ये चान्तरे कोपे समाने कारणे वृतौ ॥ ५३ ॥
चः स्याद् वृक्षे स्वरे चौरे चकोरे चन्द्रमस्यपि ।
अन्योऽन्यार्थे विकल्पार्थे समासे पादपूरणे ॥ ५४ ॥
पक्षान्तरे समूहार्थे हेताववधृतावपि ।
अश्वालये तथा तुल्ययोगितायां च कीर्त्तितः ॥ ५५ ॥
चा स्त्री शोभा शोणिते तु चं जीवे विमले त्रिषु ।
छः सूर्ये छेदके चौरे तथा संवरणे भवेत् ॥ ५६ ॥
छं तु छन्दसि तडिति क्लीबे छन्दभृतौ पुमान् ।
त्रिष्वयं निर्मले मौने[3] मलिने भेदकेऽपि च ॥ ५७ ॥

---

१ क. मृष्यवर्णे । ख. ग. सूर्ये वर्ण्ये । २ ख. ग. घनने । ३ ख. ग. मीने ।

जो जवे विषमे मेरौ स्वर्गे पातरि मत्सरे ।
विष्णौ च विगते जीवे जं द्वीप-योषितोः कुचे ॥ ५८ ॥

जूर्विहायसि जवने पिशाच्यां विगतद्युतौ ।
जूः स्त्री वाण्यां समाख्याता स्यादम्बा-कीटयोर्भगे ॥ ५९ ॥

जीः कीर्त्यां सबले [1]तूर्णे यवे जेतरि जीर्वचि ।
जा नियोगे खले जारे योगे च जनवल्लभे ॥ ६० ॥

झः स्यादङ्गे झशब्दस्तु पुमान् दातरि हंसके ।
प्रतापे भ्रमरे नष्टे चौरे [2]रुचौ च मारुते ॥ ६१ ॥

झो [3]व्यूहे विषये गर्वे लेपे मूर्ध्नि खरध्वनौ ।
महेश्वरे च वाञ्छायां क्लीबे तु भय-पद्मयोः ॥ ६२ ॥

ञशब्दो गायने गूढरूपके घर्घरध्वनौ ।
ज्ञः प्राज्ञे त्रिषु ना चन्द्रसूनावात्मनि वेधसि ॥ ६३ ॥

टः पुमान् कटके भूपे तापेऽर्ककिरणे ध्वनौ ।
चापध्वनौ जले वायौ विषये करके कटे ॥ ६४ ॥

करङ्के टः कुलालास्त्रे प्रहारे टं पुनर्गवि ।
कपाटा-ऽऽवर्त्तयोः सूनौ भू-व्यावृत्त्योस्तु टा स्त्रियाम् ॥ ६५ ॥

ठः शङ्करे बृहद्धासे बृहद्ध्वनौ जटा-ऽब्दयोः ।
बस्तौ स्वने घटे चित्रे वृषभध्वनि-मेघयोः ॥ ६६ ॥

ठः पुमान् वृषभे शून्ये हासे त्रासे क्षये ध्वनौ ।
शङ्खध्वनौ रौद्ररसे ठं क्लीबे चन्द्रमण्डले ॥ ६७ ॥

विधवायां च डाकिन्यां व्रीडावाचि तु ठा स्त्रियाम् ।
डो मेढ्रे वेगिते [4]झाँप्ये यामिनीपतिमण्डले ॥ ६८ ॥

---

१ क. चूर्णे । २ ख. ग. रुचावुमारुते । ३ क. वाहे । ४ क. ख. जाप्ये ।

डः पिशाचे भये काले रागे पान्थे ध्वनौ[1] च ना ।
डं क्लीबे डामरे दुर्गे पन्थे डमरुकेऽपि च ॥ ६९ ॥
आन्दोलने तु त्रिषु च डशब्दो गायने जडे ।
ढक्कायां ढा स्त्रियां क्लीबे ज्ञा[ने] तुर्यमुखेऽपि ढम् ॥ ७० ॥
त्रिष्वयं निर्गुणे रूढे सौम्ये सव्या-ऽपसव्ययोः ।
णशब्दस्तु पुमान् मारे भैरवे कङ्कटे ध्वनौ ॥ ७१ ॥
मोचने प्रकटे बन्धे प्रस्तुते निष्फले कणे ।
णा स्त्रियां रजनी-शय्या-धेनु-नाशा-कृपासु च ॥ ७२ ॥
णं सरोजदले ज्ञाने त्रिषु निस्तुषवस्तुनि ।
तशब्दः पुंसि संयोगे निश्चये कोल-पुच्छयोः ॥ ७३ ॥
धातुवादविधौ चौरे सत्सङ्ग्रामे तु ता स्त्रियाम् ।
करुणायां महालक्ष्म्यां पूजायां वारयोषिति ॥ ७४ ॥
नपुंसके तु तं तूणे कर्मार्थ-सूचकार्थयोः ।
तुशब्दः क्रीडने स्त्री स्यात् क्रीडके त्वभिधेयवत् ॥ ७५ ॥
तु स्यात् पूर्वनिवृत्तौ च पूर्वस्मादवधारणे ।
विलेखने विकल्पार्थे स्यात् पादपूरणेऽव्यये ॥ ७६ ॥
तत् शब्दः प्रकृतार्थोक्तौ[3] त्रिषु हेतौ तथाऽव्ययम् ।
तृट् पिपासेहयोः स्त्री स्यात् तृष्णायां कान्ति-लिप्सयोः ॥ ७७ ॥
त्विट् प्रभायां च कुत्सायां व्यवसाये महे गिरौ ।
तीस्तीव्रे विषमे शोके स्यात् प्राणिनां गतावपि ॥ ७८ ॥
थः पुंसि भूधरे भारे क्षुद्रे सत्वरवाचके ।
थोऽव्यये कुञ्जरे काले क्लीबे भयनिवारणे ॥ ७९ ॥
वाच्यलिङ्गस्तु विमले पृथुले श्यामले कचे ।
स्त्रीलिङ्गे चोपचारण्यां थीस्ताडवविकारके ॥ ८० ॥

---

१ क. ख. ग. ध्वनावने । २ ख. ग. वारयोषिताम् । ३ ख. ग. क्रीडनेऽर्थोक्तौ ।

निर्भर्त्सने भये पुं स्याद् दो वधे भव-वालयोः ।
दः पुंसि बन्धने छेदे दो दाने दायकेऽपि च ॥ ८१ ॥
दाने दातरि दा केचिद् दा स्त्रियां दन्ति-दानयोः ।
विखण्डने भवेद् दुस्तु दुस्तरा-ऽरण्ययोरपि ॥ ८२ ॥
दं क्लीबे पान-वैराग्य-कलत्रेष्ववलोकने ।
भेद्यमूलस्त्वयं मूके दुहिते द्रावके शुचौ ॥ ८३ ॥
दर्शन-ज्ञान-नेत्रेषु वस्त्रद्रष्टरि[1] च त्रिषु ।
द्यं खण्डने रिपौ त्यागे गमनस्यावभर्त्सने ॥ ८४ ॥
द्युर्वह्नौ दिवसे द्यो तु नाके नभसि बन्धने ।
स्याद् दः प्रथमयोगे स्त्री दृक् स्याद् दिन-नेत्रयोः ॥ ८५ ॥
धः पुंसि धर्मिके धीरे श्वित्रा-[2]ऽश्ववारयोर्वधे ।
धं क्लीबे धनदे धीरे ध्याने स्याद् धन-वेश्मयोः ॥ ८६ ॥
धीपुत्र्यामौषधीमात्रे धी बुद्धौ विबुधेऽपि च ।
स्यात् स्त्रियां धा ध्वनौ ध्याने यादे ध्वन्वन्तरौ घटे ॥ ८७ ॥
धा विरञ्चौ च बह्वर्थे गुह्यकेशे च मर्कटे ।
धूश्च धूल्यां धराकम्पे रथाख्ये भार-कम्पयोः ॥ ८८ ॥
हेरम्बे नः पुँमान्[4] स्त्री ना नाभौ कल्याण-भूषयोः ।
वध्य-सूक्ष्मा-ऽपरिक्लिष्ट-शून्या-ऽभीष्टे पुनस्त्रिषु ॥ ८९ ॥
अस्मानस्मभ्यमस्मा[5]कं स्थाने नः परिकीर्त्तितः ।
निषेधेऽर्थेऽव्यये बन्धौ[6] क्लीबे नं ज्ञान-वाद्ययोः ॥ ९० ॥

---

१ क. वस्त्रदष्टिषु च । २ ख. ग. स्विन्ना-ऽश्व । ३ क. ख. ग. विबुधावपि स्यात् । ४ क. ख. ग. पुनः स्त्री । ५ क. स्माकं मेकां स्थाने तु ससदि । निषेधे । ख. ग. स्माकं पेकां स्थाने तु कां तु सम्पदि । निषेधे । ६ क. ख. ग. बभ्रौ क्लीबे नद्या ।

ना निःश्रुते नरे नाभौ नेतरि ज्ञान-बन्धयोः ।
न्वव्यये प्रतिषेधे स्यात् स्त्री [1]नौ तरणि-शालयोः ॥ ९१ ॥
निः साक्षेपे तु नित्यार्थे भृशार्थाशयराशिषु ।
कौशले बन्धने मोक्षे संशये दानकर्मणि ॥ ९२ ॥
[2]अधोभवोपरमयोः क्रीताद्यर्थे नरे नृपे ।
सन्निधाने निषधे स्त्री निर्णये तु चये व्यये ॥ ९३ ॥
नी नीड-नीरयोर्नद्यां नो निषेधेऽव्यये हरौ ।
ननु प्रश्ने वितर्के च विकल्पेऽनुशये पुनः ॥ ९४ ॥
[3]नुगास्येरुहये स्त्रीणां(?) न्यङ् निम्ने नीच-कार्त्स्न्ययोः ।
पः पुमान् पवने शैले प्रकाशे कौस्तुभे क्षणे ॥ ९५ ॥
शुभे लग्ने पयःपाने प्रौढे च वर्णके पथि ।
पानमात्रेऽथ पं क्लीबे हेम्नि पा पान-पात्रयोः ॥ ९६ ॥
स्त्रीलिङ्गे त्वम्बुधारायां सुधायां सम्मतौ च पाः ।
स्त्रीपित्रोः सुनृपे पापे श्रुते पातरि पालके ॥ ९७ ॥
[4]वस्त्रे पार्थे प्रयत्ने च पुं च पुर-शरीरयोः ।
पूरणे चाथ पूः शब्दः पुरुषे परमात्मनि ॥ ९८ ॥
फो जल्पे निष्फले लोहे पुष्करे भयरक्षणे ।
झञ्झावाते फले फेने शस्त्राग्रे पुंसि फा स्त्रियाम् ॥ ९९ ॥
फालायां निष्ठुरोक्तौ च पिण्ड-केका-कुटीसु च ।
अनुस्वारे परोक्षे वा फशब्दो वाच्यलिङ्गकः ॥ १०० ॥
फूः रहे फूत्कृते शोके स्याद् वातूल[6]कपूरयोः ।
बः कुम्भे वरुणे बिन्दौ विकल्पे भे गुरौ मदे ॥ १०१ ॥

---

१ क. ख. ग. णौ । २ ख. ग. अथो नाथोपर सयोः । क्रीतावर्थे । ३ क. नुगास्सेरुहे स्त्रीणां । ४ ख. ग. वस्त्रे स्वार्थे प्रयत्ने च पुं स्त्री पुर । ५ क. पण्डारे काकुटासु । ६ ख. ग. लद्धछो ।

विभूतिकारे कलहे पक्षिगर्भे च पर्वणि ।
मूर्खे बाले कचे व्योम्नि पद्मे स्याद् विगतावपि ॥ १०२ ॥

बं शम्भौ च[1] सुवायौ च जले जगति रक्षके ।
शङ् वे(?)स्यादौषधीभेदे स्यादौपम्येऽव्यये पुनः ॥ १०३ ॥

भः शोभा भ्रमरे भावे शुक्रेऽशौ जलदे पुमान् ।
आकाशे च मयूरे च प्रभावे सूर्य-शब्दयोः ॥ १०४ ॥

भा स्त्रियां काहला[2]-वल्ली-शृङ्खलास्वमले त्रिषु ।
भा तु व्यलङ्कृते दीप्तौ स्त्रियां भाः किरणे द्युतौ ॥ १०५ ॥

क्लीबे भं गगने रात्रौ तारायां पुर-चक्रयोः ।
भी स्त्री भीत्यां खगे पुंसि स्थान-भूम्योस्तु भूः स्त्रियाम् ॥ १०६ ॥

मः पुंसि बन्धने पिङ्गे पिङ्गला-ऽऽभीरवर्णयोः ।
मौलौ विधौ मले मूले क्लीबे मं मूलके शुभे ॥ १०७ ॥

स्यान्मेढ्राग्रमणौ जीवे हरौ मासे च मा पुमान् ।
माऽव्ययं प्रतिषेधे स्त्री वारणे जभने रवौ ॥ १०८ ॥

मालायां देशभेदे च रमायां स्त्री जने तु मा ।
मा स्त्री माने कृतौ वेलान्ते[3] धी-स्त्री-व्यय-वस्तुषु ॥ १०९ ॥

अस्मच्छब्दे[4] द्वितीयायां धेनौ षष्ठ्यां च मे[5] पुनः ।
बन्धने मूः समाख्यातो मुकुन्दे मौन-मोक्षयोः ॥ ११० ॥

यं[6][:] रूयङ्गे निलये वायौ यमे धातरि पातरि ।
यशब्दः सर्वनामाख्यस्त्रिषु हेतौ यमव्ययम् ॥ १११ ॥

ग्रामे कुले वटे वाते यमम्भसि पशावपि ।
या स्त्रियां पान-मञ्जर्योः शोभा-लक्ष्म्योश्च प्रापणे ॥ ११२ ॥

---

१ क. चमुवायौ । ख. ग. वमुवायौ । २ ख. ग. काहली । ३ ख. ग. वैलाते धात्री । ४ अश्मच्छेदे क. ख. ग. ५ ख. ग. माषु नः । ६ क. ख. ग. योरुयङ्गे ।

या स्त्री ख्या तु प्रकथने ज्या मौर्वी-मातृ-भूमिषु ।
खट्वाङ्गे याज्ञिके यातौ यो यातरि श्रियि स्त्रियाम् ॥ ११३ ॥
द्युर्ना दिव्यह्नि वह्नौ च स्वर्व्योम्नोर्द्यौर्दिवि स्त्रियाम् ।
स्यः प्रहारे भवेत् काले स्यः स्पर्शे [1]त्ववखण्डने ॥ ११४ ॥
रः पुमान् पावके कामे क्षये वज्रे शरे व्यये ।
रा स्त्रियां हेम्नि शालायां [2]क्रोधे ना शुख-लीप्सयोः(?) ॥११५॥
राज्ये रागे नृपे रामे राढायां बलविक्रमे ।
रा पूर्णे रमणे क्रूरे रिः स्वसायां गिरावपि ॥ ११६ ॥
रा पुनर्विभवे मेघे स्थानके रस्तु रक्षणे ।
भीतौ रजसि रङ्के च भये च पुन री भ्रमे ॥ ११७ ॥
रं क्लीबे रुधिरे मूर्ध्नि ध्याने व्योमा-ऽण्ड-कुक्षिषु ।
वक्त्रे भये च त्रिषु तु [3]विरसे स्त्यान-तीक्ष्णयोः ॥ ११८ ॥
स्त्री रु जालेच्छयोः कान्तौ ऊर्णायुद्धे नयध्वनौ ।
स्त्री कामिनी-वम्रिकयोः रू स्वर्णे कामरूपिणि ॥ ११९ ॥
श्रीर्वेष-रचना-शोभा-संपत्-सरलशाखिषु ।
कन्यायां [4]चरुकामिन्यां सम्पत्सु सरलद्रवे ॥ १२० ॥
वाणी-लक्ष्मी-लवङ्गेषु विषे [5]बिल्वेऽथ च त्रिषु ।
[6]जटायां द्राक् पूरणे स्त्री व्योम्नि मन्दगतौ स्त्रियाम् ॥ १२१ ॥
क्रू क्रूरे त्वण्डजे व्याधे क्रीरम्नौ रोदने वधे ।
लः खण्डेऽलौ तृषादाने इन्द्रे तु [7]चलनेऽनिले ॥ १२२ ॥
लिर्लवे लीश्च विश्लेषे कङ्कणे दृढबन्धने ।
[8]लाश्चामृते दशायां लश्चाऽलौ च बिडौजसि ॥ १२३ ॥

---

१ ख. ग. त्वनखण्डने। २ क. क्रोधनाशु। ३ क. ख. ग. वीरसंस्थानमीक्ष्णयोः। ४ क. चारु। ५ क. ख. ग. विंशद्वीयेऽथ। ६ ख. जरायां वा पूरणे स्त्री व्योममन्द। ७ चलनेऽमृले (? ते)। ८ ख. ग. लाश्च मृत्ये दशायां च लश्च लौ च।

लाऽदने लूश्च लवने तृणेन्द्र-लवनेषु ला[1] ।
वं क्लीबे शत्रुहनने वंशे च गिरिभेदके ॥ १२४ ॥
वः पुमान् गत्वरे वायौ संयमे वरुणे स्मरे ।
कान्तारेऽग्नौ वधे रुद्रे सान्त्वने चाव्ययः पुनः ॥ १२५ ॥
[2]द्वितीयायाश्चतुर्थ्याश्च षष्ठ्याश्चापि बहुत्वके ।
विश्वासां विभक्तीनां च द्वित्वे वा[म्] कथितो बुधैः ॥१२६॥
पदार्थे उपमाने च विकल्पे च समुच्चये ।
वि श्रेष्ठा-ऽतीतयोर्हेतौ नानार्थे पादपूरणे ॥ १२७ ॥
विर्नेत्रे व्योम्नि वारे च परमात्मनि पक्षिणि ।
वी विवादे च विज्ञाने वाग् भारत्यां वचस्यपि ॥ १२८ ॥
वैश्ये जने पुरीषे विट् क्रमात् पुंसि द्वयोः स्त्रियाम् ।
परदाररते काके प्रदेशे कुण्डले कटौ ॥ १२९ ॥
शोके स्तब्धे स्वने पुंसि शुः शूद्रे वसुधारके ।
शा तु शाते च शास्तायां शाखा-मरणयोरपि ॥ १३० ॥
शा वाल्मिके शिवे कूर्मे भूपे शिश्च तनौ कुतौ[3] ।
शि स्त्रियां देवपूजायां शक्तौ शोभा-वरेण्ययोः ॥ १३१ ॥
बाणौघे हनने जीवे शी शोके च क्षये बुधे ।
रमायां चाथ शं क्लीबे शास्त्रे प्रेयसि मङ्गले ॥ १३२ ॥
कीर्त्तौ शक्रायुधे स्वर्गे शः परोक्षे त्रिलिङ्गकः ।
शं सत्ये शङ्करे शेषे कान्तावदनलोकने ॥ १३३ ॥
शमव्ययं सुखार्थे च शिः शम्भु-शिवकान्तयोः[4] ।
शिर्बाण-हिंसा-स्वापेषु शीः शये शुर्निशाकरे ॥ १३४ ॥

---

१ ख. ग. लम् । २ १२४–१२५ श्लोकौ त्रिष्वपि प्रतिषु व्यत्यासेन वर्त्तेते, तथाप्यर्थसङ्गत्यनुसारेणास्माभिः क्रमभेदेन स्थापितौ स्तः । ३ ग. बृतौ । ४ क. शम्भौ शबकान्तयोः ।

षः स्वर्गे विषये श्रेष्ठे पुंसि षूः प्रसुतावपि ।
षः पुनः सारसे इष्टे स्तम्भ-खर्जूरयोरपि ॥ १३५ ॥
षा स्त्री रमायां षं क्लीबे गर्भमोक्षा-ऽवसानयोः ।
मर्षणे च त्रिलिङ्गस्तु परोक्ष-श्रेष्ठयोरयम् ॥ १३६ ॥
सः पुंसि मदने वायौ परोक्ष-सूर्ययोरपि ।
सनातने [1]सत्यवति शङ्कायामव्ययस्तु सः ॥ १३७ ॥
सङ्गार्थे शोभनार्थे च प्रकृष्टार्थ-समर्थयोः ।
प्रथमे तदवस्थाने निवासे सफलेऽपि च ॥ १३८ ॥
स्यादलिनिकरे नीरे [2]क्रोधे गर्भोपभाषणे ।
स्मृतौ लक्ष्म्यां च रामायां देहकान्तौ तु सा स्त्रियाम् ॥१३९॥
सं क्लीबे स्यन्दने मार्गे ज्ञाने ध्याने [3]विचारणे ।
सं नक्षत्रे तु सूः शब्दे प्रेरणे गर्भमोक्षणे ॥ १४० ॥
सु शब्दः सेवने स्त्री स्यात् भृत्य-पूजनयोरपि ।
सत् सत्ये विदुषि श्रेष्ठे साधौ भवति च त्रिषु ॥ १४१ ॥
सन् नित्ये शोभने व्योम्नि विद्यमाने च सत्यपि ।
स्वादिपूजितयोश्चार्थे स्वः स्वर्ग-परलोकयोः ॥ १४२ ॥
स्वमात्मनि धने ज्ञातौ तद्ब्रह्मणि गुणत्रये ।
हः शङ्करे हरौ हारे हरणे पुलके भटे ॥ १४३ ॥
मानविशेषे मन्यौ च नदीतीरे भयङ्करे ।
हो हर्षे वायुपुत्रे स्यात् सम्बुद्धौ पादपूरणे ॥ १४४ ॥
गजे प्रचेतसि स्त्री तु हा त्यागे गीत-बाणयोः ।
हि हेतौ पादपूर्त्तौ तु विशेषेऽप्यवधारणे ॥ १४५ ॥
रोषोक्ति-स्फुटयोर्हो च हास्ये विषाद-विस्मयोः ।
ही हेतौ वह्नि-स्वल्पे च परप्रश्न-वितर्कयोः ॥ १४६ ॥

---

१ ख. ग. सत्यवन्ते । २ ख. ग. क्रोधगर्भापराशणे । ३ क. निवारणे ।

हे हेतावपि सम्बुद्धौ हं खेदे शेषभाषणे ।
हं क्लीबमस्त्र-मुखयोः कणिते मणिरोचिषि ॥ १४७ ॥

परब्रह्मा-ऽऽमन्त्रणयोर्ह्राश्च प्रोन्मत्त-हास्ययोः ।
हूमव्ययः परिप्रश्ने वितर्के[1] पवने तु हौ ॥ १४८ ॥

हे कुत्सायां तथा है तु ह्र तु सम्बोधने तु हौ ।
क्षो राक्षसे क्षमे क्षेत्रे क्षेत्रपाले नृपे नरे[2] ॥ १४९ ॥

क्षः संरोधे विषौ भक्ष्ये क्षेमे दुःखप्रिये घने ।
क्षमा स्त्री क्षमाऽथाप्यनिन्दायां प्रत्यवाये च पुस्तके ॥ १५० ॥
नवोढाया भगे शूचौ क्षं क्लीबे क्षिप्र-दक्षयोः ।
क्ष मसृणे त्रिलिङ्गस्तु परोक्ष-क्षेत्रयोरपि ॥ १५१ ॥

क्षिः क्षये च तथा क्षिप्रे शब्दा ये द्व्यक्षरादयः ।
स्वरान्ता व्यञ्जनान्ताश्च ज्ञेया ग्रन्थान्तराच्च ते ॥ १५२ ॥

प्रह्लादपुरसम्भूतो दामोदरोऽभवत् पुरा ।
ग्रन्थकर्त्ताऽभवत् तस्मात् कालिदासाभिधः कविः ॥ १५३ ॥

॥ इति कालिदासकृतौ एकाक्षरी नाममाला समाप्ता ॥

*

१ ख. ग. वचने । २ ख. ग. स्मरे ।

[२६] श्रीमहेश्वरकवि-प्रणीता-एकाक्षरी नाममाला

को ब्रह्मा-ऽऽत्मा-ऽनिला-र्केषु शमने सर्वनाम्नि च ।
पावके च मयूरे च, सुख-शीर्ष-जलेषु कम् ॥ १ ॥

कु पापे चेषदर्थे च कुत्सायां च निवारणे ।
मनागल्पे च मन्दे च धिग् निर्भर्त्सन-निन्दयोः ॥ २ ॥

कुं प्रश्नेऽपि रुषोक्तौ च प्राध्वं नम्रा-ऽनुकूलयोः ।
खमिन्द्रिये सुखे स्वर्गे शून्ये बिन्दौ विहायसि ॥ ३ ॥

पुरे संवेदने क्षेत्रे कुलाहलफले क्वचित् ।
गौः स्वर्गे वृषभे रश्मौ वज्रे चन्द्रमसि स्मृतः ॥ ४ ॥

अर्जुने नेत्र-दिग्-बाण-भू-वाग्-वारिषु गौर्मता ।
घो घर्घरे च घण्टायां काञ्चिका-घातयोरपि ॥ ५ ॥

चान्वाचये समाहारेऽप्यन्योऽन्यार्थे समुच्चये ।
पक्षान्तरे तथा पादपूरणेऽप्यवधारणे ॥ ६ ॥

जो जन्यां जातमात्रे च मृत्युञ्जये जनार्दने ।
जराकाशे सरस्वत्यां पिशाच्यां जवनेऽपि च ॥ ७ ॥

तु पादपूरणे भेदे समुच्चयेऽवधारणे ।
तुं प्रश्नेऽङ्गीकृतौ रोषे आस्मृतौ चावधारणे ॥ ८ ॥

नु स्यात् प्रश्ने विकल्पार्थेऽप्यतीता-ऽनुनयार्थयोः ।
नि निवेश-भृशार्था-ऽधोभाव-विन्यास-राशिषु ॥ ९ ॥

आश्रये बन्धने मोक्षे दारकर्मणि दर्शने ।
अन्तर्भावे च सामीप्य-कौशलोपरमेषु च ॥ १० ॥

नित्यार्थे संयमे चापि क्षेपार्थेऽपि च विश्रुतम् ।
बशब्द उपमायां स्याद् वरुणेऽनुनयेऽपि च ॥ ११ ॥

बा स्याद् विकल्पोपमयोरेवार्थेऽपि समुच्चये ।
बि श्रेष्ठा-ऽतीत-नानार्थे बिः स्याद् पक्षिष्वनव्ययम् ॥ १२ ॥

बै स्यात् सम्बोधने पादपूरणेऽनुनयेऽपि च ।
भः स्यान्मयूखे शुक्रे भं नक्षत्रे च प्रकीर्तितम् ॥ १३ ॥

भूः पृथिव्यां स्थानमात्रे कथितः शब्दवेदिभिः ।
मः शिवे मा रमायां च मा निषेधेऽव्ययं मतम् ॥ १४ ॥

स्म पादपूरणेऽतीते सामि (?) निन्दा-ऽर्द्धयोर्मतम् ।
यः सर्वनामाऽनिलयोर्ज्या मौर्वी-मातृ-भूमिषु ॥ १५ ॥

द्युरग्नौ दिवसेऽपि स्याद् द्यौः स्वर्ग-सुरवर्त्मनोः ।
रः पावके च तीक्ष्णे च राः स्मृतः स्वर्ण-वित्तयोः ॥ १६ ॥

प्र प्रकर्षे गताद्यर्थे दुः स्यात् कष्ट-निषेधयोः ।
स्रुः स्रवे निर्झरे चापि द्रूः स्वर्णे कामरूपिणि ॥ १७ ॥

श्रीर्वेश-रचना-शोभा-भारती-सरलद्रवे ।
लक्ष्म्यां त्रिवर्गसम्पत्तौ वेशोपकरणे मता ॥ १८ ॥

वं प्रचेतसि जानीयादिवार्थे च तदव्ययम् ।
स्वं ज्ञातावात्म-धनयोरात्मीयं च प्रचक्ष्यते ॥ १९ ॥

शं सुखे शर्मणि प्रोक्तं श्रेयसि शश्च शस्त्रके ।
सं सङ्गार्थे प्रकृत्यर्थे शोभनार्थ-समर्थयोः ॥ २० ॥

सु पूजायां भृशार्था-ऽनुमति-कृच्छ्र-समृद्धिषु ।
हः स्यात् सम्बोधने पादपूरणेऽनव्ययं शिवे ॥ २१ ॥

हा विषादे च शोके च दुःखार्थेऽपि च कथ्यते ।
हि पादपूरणे हेतौ विशेषेऽप्यवधारणे ॥ २२ ॥

ही दुःख-हेतावुद्दिष्टो ह्री विस्मय-विषादयोः ।
हुं वितर्के परिप्रश्ने हुं रुषोक्त्यनुनीतिषु ॥ २३ ॥

हाहा दुःखे हुहु हर्षे गन्धर्वेऽमू त्वनव्यये ।
हे है व्यस्तौ समस्तौ च हूति-सम्बोधनार्थयोः ॥ २४ ॥

होहौ चैवंविधौ ज्ञेयौ सम्बुद्ध्याह्वानयोरपि ।
अ स्यादभावे स्वल्पार्थे विष्णावीशे त्वनव्ययम् ॥ २५ ॥

आ प्रगृह्यः स्मृतौ वाक्ये आः स्यात् सन्ताप-कोपयोः ।
इ खेदे च रुषोक्तौ च कामदेवे त्वनव्ययम् ॥ २६ ॥

ई दुःखभावने कोपे लक्ष्म्यामीः स्यादनव्ययम् ।
उ सम्बुद्धौ रुषोक्तौ च शम्भुवाची त्वनव्ययम् ॥ २७ ॥

ऊ वाक्यारम्भेऽनुकम्पा-रक्षा-हूतिष्वनव्ययम् ।
ॠ वाक्ये चापि कुत्सायां देवाम्बायां त्वनव्ययम् ॥ २८ ॥

एऐ शब्दौ तु हे-हैवत् स्मृत्या-ऽऽमन्त्रण-हूतिषु ।
ओ-औ शब्दौ च हो-हौवत् सम्बुद्ध्याह्वानयोर्मतौ ॥ २९ ॥

[विश्वप्रकाशनामशब्दकोषान्तर्गतभागः ।]

[२७] एकादिसंख्यासंज्ञाकोशः ।

१. एकसंख्यावाचकाः शब्दाः–

आदित्य-मेरु-चन्द्र-प्रासादा दीप-दण्ड-कलशाश्च ।
खड्ग-हरनेत्र-शेष-स्वर्दण्डा-ङ्गुष्ठ-हस्तिकराः ॥ १ ॥
नासावंश-विनायकदन्त-पताका मनांसि शक्राश्च ।
अद्वैतवदेकैका एवामी सुकविभिर्वर्ण्याः ॥ २ ॥

२. द्विसंख्यावाचकाः शब्दाः–

भुज-दृष्टि-पाद-कर्ण-स्तनसंख्या रामलक्ष्मणौ शृङ्गम् ।
गजदन्तौ प्रीतिरती गङ्गागौर्यौ विनायकस्कन्दौ ॥ ३ ॥
पक्ष-नदीतट-रथधुर्य-खड्गधाराश्च भरतशत्रुघ्नौ ।
रामसुतौ रविचन्द्रावित्येते द्वन्द्वगा वाच्याः ॥ ४ ॥

३. त्रिसंख्यावाचकाः शब्दाः–

भुवन-वलि-वह्नि-विद्या-सन्ध्या-गजजाति-शम्भुनेत्राणि ।
त्रिशिरोमौलि-दशा-क्षेत्रपाल-फण-काल-मुनि-दण्डाः ॥ ५ ॥
त्रिफला त्रिशूल-पुरुषाः पलाशदल-कालिदासकाव्यानि ।
वेदावस्था कम्बु-ग्रीवारेखा त्रिकूटकूटानि ॥ ६ ॥
हरहतपुर-त्रियामायामा यज्ञोपवीतसूत्राणि ।
जैन(?ने)रत्न—च्छत्र-प्रदक्षिणा-गुप्ति-शल्यानि ॥ ७ ॥
मुद्रा-प्रमाण-गौरव-शिवभवमार्गाः शुभेतरा लेश्याः ।
सर्वेऽप्यमी त्रिसंख्योपेताः काव्ये निबद्धव्याः ॥ ८ ॥

४. चतुःसंख्यावाचकाः शब्दाः–

ब्रह्ममुख-वेद-हरिभुज-सुरगजरद-वर्ण-चतुरिकास्तम्भाः ।
सङ्घ-समुद्राशमघात(?)-गोस्तना-ऽऽश्रम-कषाय-दिशः ॥ ९ ॥
गजजाति-याम-सेनाङ्ग-दण्डहस्ता महाजने वणिजः ।
दशरथपुत्रोपाय-ध्यान-कथा-ऽभिनय-रीति-गोचरणाः ॥ १० ॥
माला-स्तबक-कराङ्गुलि-संज्ञा-सुरभेद-योजनक्रोशाः ।
एते सलोकपालाः काव्ये योज्याश्चतुःसङ्ख्याः ॥ ११ ॥

५. पञ्चसंख्यावाचकाः शब्दाः –

स्मरबाण-पाण्डवेन्द्रिय-कराङ्गुली-शम्भुमुख-महायज्ञाः ।
विषय-व्या[क]रणाङ्ग-व्रत-वह्नि-सुपार्श्वफणिफला(णा)श्चैव ॥ १२ ॥
परमेष्ठि-महाकाव्य-स्थानक-तनुवात-मृगशिरश्च तथा ।
पञ्चकुल-महाभूत-प्रणाम-पञ्चोत्तरविमानाः ॥ १३ ॥
महाव्रत-मरुद्वृक्ष-समिति-स्थानकानि च ।
शस्त्रश्रमस्य चैतानि बध्नीयात् पञ्चसंख्यया ॥ १४ ॥

६. षट्संख्यावाचकाः शब्दाः –

रस-राग-चक्रकोणास्त्रिशिरोनेत्रा-ऽन्तराणि गुण-तर्काः ।
दर्शन-गुहमुख-भूषण्ड-चक्रिणः स्युरिह षट् संख्याः ॥ १५ ॥

७. सप्तसंख्यावाचकाः शब्दाः –

द्वीप-रविवाह-पाताल-शक्रवाहमुख-दुर्गति-समुद्राः ।
श्रीपार्श्वचिह्नफणिफल(ण)-तत्त्व-क्षेत्रा-ऽनलज्वालाः ॥ १६ ॥
राज्याङ्ग-धान्य-भुवन-स्वर-कुलपर्वत-नयाः समं तानाः ।
भय-सप्तपर्णपर्णा गोदावर्यस्त्वमी सप्त ॥ १७ ॥

८. अष्टसंख्यावाचकाः शब्दाः –

दिग्-देश-कुम्भिपालाः कुलपर्वत-शम्भुमूर्त्ति-वसवश्च ।
योगाङ्ग-व्याकर[ण]-ब्रह्मश्रुत्यहिकुलान्यष्टौ ॥ १८ ॥

९. नवसंख्यावाचकाः शब्दाः –

भूखण्ड-कृत्तरावणमुण्ड-सुधाकुण्ड-जैनपद्मानि ।
ग्रैवेय-रस-व्याघ्रीस्तन-गुप्ति-निधि-ग्रहास्तु नवसंख्याः ॥ १९ ॥

१०. दशसंख्यावाचकाः शब्दाः –

रावणमुखा-ऽङ्गुली-चन्द्रवाह-यतिधर्म-शम्भुकर्ण-दिशः ।
अङ्गद्वारा-ऽवस्थाः दशाः पुनः संख्यया दशैव स्युः ॥ २० ॥

११. एकादशसंख्यावाचकाः शब्दाः –

रुद्राक्षास्तन्नेत्राण्यङ्गोपाङ्गानि जिनमतोक्तानि ।
एकादश ध्रुवं स्युस्तथा जिनोपासकप्रतिमाः ॥ २१ ॥

१२. **द्वादशसंख्यावाचकाः शब्दाः–**

गुहनेत्र-राशि-मासाः सङ्क्रान्त्यादित्य-चक्रिराजानः ।

चक्रि-बृहस्पतिहस्ताः सभासदो द्वादश भवन्ति ॥ २२ ॥

१३. **त्रयोदशसंख्यावाचकाः शब्दाः–**

प्रथमजिनभवा-ऽघोषा विश्वेदेवास्त्रयोदश भवन्ति ।

विद्यास्थान-स्वर-भुवन-रत्न-पुरुषान्वय-स्वप्नाः ॥ २३ ॥

१४. **चतुर्दशसंख्यावाचकाः शब्दाः–**

जीवा-ऽजीवोपकरण-गुणमार्गल(ण)-रज्जु-सूत्र-पूर्वभिदाम् ।

कुलकर-पिण्डप्रकृति-स्रोतस्विन्यश्चतुर्दश तु ॥ २४ ॥

१५. **पञ्चदश-षोडशसंख्यावाचकाः शब्दाः–**

परमाधार्मिक-तिथयश्चन्द्रकलाः पञ्चदश भवन्तीह ।

१६. शुक्रार्चिषः शशिकला विद्यादेव्यस्तु षोडश भवन्तीह ॥२५॥

१७. **सप्तदशादिसंख्यावाचकाः शब्दाः–**

१८. सप्तदश संयमाश्चाष्टादश विद्या-पुराणानि ।

१९. द्वीपाः स्मृतयो ज्ञाताध्ययनान्येकोनविंशतिगतानि ॥ २६ ॥

२०. **विंशतिसंख्यावाचकाः शब्दाः–**

करशाखा श्रीभर्तुर्विंशोपकाः सकलजननखा-ऽङ्गुल्यः ।

दशकन्धरनेत्र-भुजास्तु संख्यया विंशतिर्वाच्या ॥ २७ ॥

१००. **शतसंख्यावाचकाः शब्दाङ्काः–**

कमलदल-रावणाङ्गुलि-शतमखमख-जलधियोजनानि स्युः ।

शतपत्रीपत्राऽऽदिमजिनसुत-धृतराष्ट्रनृपतिसुताः ॥ २८ ॥

जपमाला-मणिहारस्रजो-ऽस्ररुक्-कीचकाः शतप्रमिताः ।

अहिपतिमुख-गङ्गामुख-पङ्कजदल-करेन्द्रनेत्राणि ॥ २९ ॥

१०००. विश्वामित्रश्रमवर्षा-ऽर्जुनभुज-सामवेदशाखाश्च ।

पुण्यनरदृष्ठ(?दृष्ट)चन्द्राः सहस्रसंख्या अमी ज्ञेयाः ॥ ३० ॥

॥ इत्येकादिसंख्यासंज्ञाकोशः समाप्तः ॥

*

[२८] कवि रतनू वीरभांण कृत
राजस्थानीभाषानिबद्ध एकाक्षरी नाममाला ।

॥ दोहा ॥

कहत अकार ज विष्नकूं, पुनि महेस मत मांन ।
आ ब्रह्माकूं कहत है, ई जुग मा रमा जांन ॥ १ ॥
लघु उकार संकर कह्यौ, दीरघ विष्णु स देष ।
देवमात लघु रि कहै, दीरघ दनुज विशेष ॥ २ ॥
लघु लृकार सुरमात पुनि नागमात गुरु होय ।
ए जु कहत है विष्णुकौ, ऐ जु महेसुर सोय ॥ ३ ॥
ओ ब्रह्मा जु अनंत औं परब्रह्म अभिमान ।
कविकुल सब ही कहत यूं, अः महेस उर आंन ॥ ४ ॥
क ब्रह्माकूं कहत कवि, वाय सूर पुनि लेष ।
कहत आतमा सुष कहूं, क प्रकास अरु लेष ॥ ५ ॥
कं सिर कं जल कं जु सुख, कु धरती धर चित्त ।
कूं कुसमितकूं जानियौ, बहु विवेक धरि चित्त ॥ ६ ॥
खं इंद्रिय नभ खं कह्यौ, खं जु सरग पुनि सोय ।
कहै सु सून्यसे खं सबै, खं खंडग पुनि हौय ॥ ७ ॥
घंटा किंकिनि मेघसूं, कहत घ कार सब कोय ।
पुनि धुनिहूंसूं घू कहै, दक्ष गुनीजन लोय ॥ ८ ॥
कहत ङकार जूं भैरवह, अरु जि विसन जिय जांन ।
पुनि ङकार स्वरसूं कहै, चतुर चोर कहु मांन ॥ ९ ॥
चंद हि कहत चकार सब, अरु जु चोर कह मांन ।
सोभासूं सब कहत है, पक्ष सबदसूं जांन ॥ १० ॥
छं निरमल सब ही कहै, बहुर बीजुरी देष ।
छेदनहूकूं कहत कवि, पुनि जु संबर लेष ॥ ११ ॥

कहत जकार जु वेगसूं, अरु जु तेजसूं कोय ।
पूजाहूंसूं सब कहै, जेता जय वह होय ॥ १२ ॥

कहत झकार जु भैरवह, बहुर नष्ट कहुँ सोय ।
पुनि झकार वंचक कह्यौ, घरघर स्वर ही होय ॥ १३ ॥

मूढ रूप विषयातमा, अरु जु गायन हि गाय ।
झरजर स्वरसूं कहत है, सबै ञकार बनाय ॥ १४ ॥

ट पृथिवीसूं कहत कवि, टं वायस बहु जांन ।
कहत टकार जु ईश्वरी, वरहु जु स्वस्तन मांनि ॥ १५ ॥

कहत ठकार विसालसूं, पुनि धनसूं सब कोय ।
चंदमंडल ठं कहत कवि, ड संकरधुनि होय ॥ १६ ॥

ढक्काकूं ढ कहत कवि, ध्वनि निगूढ कह जांन ।
पुनि णकार कहि जांनसूं, अरु जु स्तुति कहुँ आंन ॥ १७ ॥

चोर क्रोध पुनि पुछि कहुँ, कहुँ तकार दे चित्त ।
भयरक्षण जु थकार कहुँ, सिला समूही मित्त ॥ १८ ॥

वेद दांन दातारसूं, अरु कलित्र द मांनि ।
धांन धात धन बंधन हि, कहत धकार सु जांनि ॥ १९ ॥

कहत जांन विश्वास पुनि, अरु जु निषेद नकार ।
नौ नावकहू कहत है, पंडित समझ निहार ॥ २० ॥

पवन पातरि पावन कहुँ, कहुँ पकार नित मित्त ।
रण्य सुसुप्त फकार कहुँ, प्रगट जु तिन कहुं नित्त ॥ २१ ॥

झंझावाय फकार कहुँ, कहुँ फकार भयरक्ष ।
निष्टजला सु फकार कहुँ, अरु फकार ही दक्ष ॥ २२ ॥

फूंकारे फूं कहत कवि, अफळ वचन फू आहि ।
पुनि बकार संग्राम कहि, अरु प्रवेस कहुँ मांहि ॥ २३ ॥

भ नक्षत्र पुनि भ्रमर, भ दीपत भानू भूम ।
भयकारण भी कहत सब, ता कहुं चित्त न झूम ॥ २४ ॥
चंद्र रुद्र सिर मा कहत, मा लच्छी परमान ।
माल मात अष्णा....मी, मुनि बंधन मू जांनि ॥ २५ ॥
मं जम काल यकार कहि, सूर श्रेष्ठ मन मांन ।
जांन जात अरु त्याग कहुं, बुधजन कहत सुजांन ॥ २६ ॥
काम अनल अरु वज्र पुनि, शब्द रूप धर चित्त ।
कहुँ रकार जल स्रवनको, रट्टन भय कहुं नित्त ॥ २७ ॥
इंद्र लवन दत व्याज पुनि, कहि लकार परसिद्ध ।
ली श्लेषम लयसूं कहै, लः निस्तक कहुं व्रिद्ध ॥ २८ ॥
सांत्वन वरनु रवी त कहुं, कहुं वकार समरत्थ ।
गति नय नर अरु श्रेष्ठ पुनि, कहुं वकारके अर्थ ॥ २९ ॥
कहत सकार परोखकूं, पुनि सोभा अति श्रेष्ठ ।
शं कल्यानह कहत है, संजुक्त ति पुनि श्रेष्ठ ॥ ३० ॥
सयनकाज सी कहत कवि,....वीदो(?)हंसा मान ।
कहत षकार परोखकूं, झाल खरी कहुं ठान ॥ ३१ ॥
कहत षकार जु स्नेहकूं, अरु सूला कहुं मान ।
हरह हकार विचित्र है, हे संबोधन ठान ॥ ३२ ॥
कहत क्षकार जु क्षीमकूं, क्षमा क्षनेका जांन ।
आद अकार क्षकार लौं, यह विध बरनत भांन ॥ ३३ ॥
विदुषन मुख सुनि तरक षट, अष्टादस हि पुरांन ।
नाममाल एकाक्षरी, भाषी रतनूं भांन ॥ ३४ ॥

*

इति श्रीघडोईरा रतनूं वीरभांण कृत एकाक्षरी नाममाला सपूर्णा ॥ सं १९५६ ना वर्षे श्रावणवदि ३ रवौ लिषिता श्रीगोडीजी प्रशादात् ॥

*

॥ ॐ ह्रीँ श्रीँ अर्हं नमः । ॐ ऐँ नमः ॥

वाचनाचार्यश्रीवल्लभगणिविरचितं

विद्वत्प्रबोधशास्त्रम् ।

[शौभरिकोशद्व्याश्रयकाव्यरूपम्]

(टिप्पणीयुतम् ।)

प्रथमः परिच्छेदः ।

सारदां शारदां देवीं श्रीगुरुं सुगुरुं पुनः ।
प्रणम्य क्रियते शास्त्रं विद्वत्प्रबोधनामकम् ॥ १ ॥
तत्र संयोगिवर्णौघैर्वर्ण्यते वस्तुवर्णना ।
सकर्णलब्धवर्णानां प्रबोधाय प्रबोधदा ॥ २ ॥
तत्राऽस्मिन् प्राक्परिच्छेदे वर्णनं क्रियतेऽधुना ।
गजा-ऽश्व-वृषभादीनां चतुश्चरणधारिणाम् ॥ ३ ॥

क्ष्णातले गजघटा प्रकटेष्टे, क्ष्णाऽऽवलीकृदिव सज्जलदाली ।
क्ष्णापतीन्द्र ! हृदयस्य मोददा, क्ष्णाऽरिराजिरनिशं मददीप्ता ॥ ४ ॥

टिप्पणी–क्ष्णा–भूः तस्याः पतयः, तेषां इन्द्रः तत्सम्बोधने हे 'क्ष्णापतीन्द्र !' नरनाथ ! । क्ष्णायाः–भुवस्तलं तत्र, प्रकटा गजघटा अनिशं ईष्टे । केव ? 'सज्जलदालीव' सन्मेघश्रेणिरिव । किम्भूता सज्जलदाली ? क्ष्णानां–धान्यकणानां आवली तां करोति इति क्विपि क्ष्णावलीकृत् । किम्भूता गजघटा ? हृदयस्य मोददा । पुनः किम्भूता गजघटा ? क्ष्णा–छिन्ना अरिराजिर्यया सा तथा । पुनः किम्भूता गजघटा ? मददीप्ता ॥ ४ ॥

क्तिप्रभेन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलैलविलकेशदिग्धवाः ।
क्ताबलेन रचयन्ति यत्स्तुतिं, क्तस्फुटा द्विपघटा विभाति सा ॥५॥
क्थालिहद् दशदिशो धृता यतः, क्थं हरन्त्यविकलं तया हि च ।
क्थो नृणां कथयतीत्ययं जनः, क्थेड् ! न किं भवति वै स्वकार्थिकः? ॥६
॥ युग्मम् ॥

टिप्पणी–क्था–मही तस्यां ईष्टे स्वामित्वेन क्थेड्–राजा तदामन्त्रणं 'हे क्थेट् !' राजन् ! सा द्विपघटा विभाति । किम्भूत हे क्थेट् ! ? क्तिः–सूर्यः, तद्वत् [प्रभा–]

प्रतापो यस्य स तदामन्त्रणम्। सा का? यस्याः—द्विपघटायाः स्तुतिः यत्स्तुतिः तां 'रचयन्ति' कुर्वन्ति। के? इन्द्रश्च हरिश्च कालश्च—यमः नैर्ऋतश्च क्तश्च—वरुणः अनिलश्च—वायुः ऐलविलकश्च—कुबेरः ईशश्च—ईशानः इन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलै-लविलकेशाः, ते च ते दिग्धवाश्च—दिक्पतय इन्द्र-हरि-काल-नैर्ऋत-क्ता-ऽनिलैलविल-केशदिग्धवाः। केन? क्ता—वाक् तस्या बलं तेन, वाक्पाटवेन इत्यर्थः। दिक्पतयः स्तुतिं रचयन्ति तत्र हेतुमाह—'यतः, यस्मात् कारणात् 'तया' द्विपघटया दशदिशो धृता अतः कारणादेव स्तुवन्तीति। को भावः? दिशां धारका गजाः, इन्द्राद्याश्च दिशां पतयः, गजाश्च दिशस्तदैव धरन्ति यदा सन्तोषिता भवन्ति, 'सन्तोषित एव कार्यं करोत्यन्योऽपि' इति लोकोक्तिः, अत एव इन्द्रादीनां स्वार्थः, तेन द्विपघटां तावकीं दृष्ट्वा दिग्गजभ्रान्त्या स्तुवन्तीति भावः। 'हि' यस्मात् कारणाद् 'नृणां क्थः' मनुष्याणां सङ्घ इति कथयति। इति इति किम्? अयं जनः 'वै' स्फुटार्थे, अयं जनः 'स्वकार्थिकः' स्वार्थी किं न भवति? अपि तु भवति इत्यर्थः। काकाऽत्र नञ्, यतो यस्य स्वार्थं भवति स तद्वर्णनं करोत्येव, अतो गजान् दिग्धर्तृत्वेनेन्द्राद्याः स्तुवन्तीति। किम्भूता द्विपघटा? क्तेन—ज्योतिषा बलकान्त्या स्फुटा क्तस्फुटा। पुनः किम्भूता द्विपघटा? क्थस्य—दुःखस्य आलिः क्थालिः, तां हरतीति क्थालिहृत्। किं कुर्वाणा द्विपघटा? 'अविकलं' सर्वं 'क्थं' दैन्यं हरन्ती ॥ ५ ॥ ६ ॥ युग्मम् ॥

क्थावलीहरणतत्परोद्धुरा, क्थावली ह्यलति मञ्जुलोद्बला।
क्थापते! तव घनार्जितश्रियः, क्थेन चैव तदवापनं यतः ॥ ७ ॥

टिप्पणी—क्थायाः—भुवः पतिः क्थापतिः, तत्सम्बुद्धौ 'हे क्थापते!' नृप! तव क्थानां—गजानां आवली क्थावली 'हि' निश्चितम् 'अलति' दीप्यते। किम्भूता क्थावली? 'क्थावलीहरणतत्परा' दुःखश्रेणिहरणप्रह्वा। 'उद्धुरा' उत्कटा। किम्भूता? ['मञ्जुलोद्बला'] मञ्जुलं उत्कृष्टं च बलं यस्याः सा तथा। किम्भूतस्य तव? घनार्जित-श्रियः। 'यतः' यस्मात् कारणात् 'क्थेन' धनेनैव 'तदवापनम्' गजघटाप्रापणं भवति, अत एव घनार्जितश्रीरिति विशेषणम् ॥ ७ ॥

क्नप्रदस्तव गजः स सङ्गरे, क्नाधिनाथ! हरति द्विषां बलम्।
क्नद्वयस्य सुखकारि यद्यशः, क्नुप्रसद्मविहितस्थितीन्दति ॥ ८ ॥

टिप्पणी—'हे क्नाधिनाथ!' हे नृपते! तव स गजः 'सङ्गरे' युद्धे द्विषां बलं हरति। स कः? 'यद्यशः' [यस्य] जयकीर्तिः इन्दति "इदु परमैश्वर्ये"। किम्भूतो गजः? 'क्नप्रदः' उत्सवदाता। किम्भूतं यद्यशः? 'क्नद्वयस्य' कर्णयुग्मस्य सुखकारि। पुनः किम्भूतं यद्यशः? क्नवः—समुद्रास्त एव प्रसद्म तत्र विहिता स्थितिर्येन तत् क्नुप्रसद्म-विहितस्थिति ॥ ८ ॥

क्मोज्झिता अपि यतीश्वरा यकं, क्मायुताः सततमर्कयन्त्यरम् ।
क्मूप्रभाप्रतिभदन्तसुन्दरः, क्मक्षम ! क्षितिप ! भाति स द्विपः ॥९॥

टिप्पणी–'हे क्षितिप !' भूप ! सः 'द्विपः' गजः भाति । स कः ? यकं यतीश्वरा अपि 'सततं' प्रत्यहं 'अर्कयन्ति' स्तुवन्ति । किम्भूता यतीश्वराः ? 'क्मोज्झिताः' कन्दर्परहिताः । पुनः किम्भूता यतीश्वराः ? क्मया–रत्या युताः क्मायुताः । किम्भूतो द्विपः ? क्मूः–शङ्खः तस्य प्रभा तया प्रतिभौ–सदृशौ यौ दन्तौ ताभ्यां सुन्दरो यः स तथा । किम्भूत हे क्षितिप ! ? क्मेषु कर्म[सु] क्षमः–समर्थो यः स तथा तत्सम्बोधनम् ॥ ९ ॥

क्यप्रताप ! नृपतीन्द्र ! तावकः, क्यप्रतप्तघनगोलबिन्दुयुक् ।
क्यब्विलोप इव पञ्चमीं गजः, क्यऽद्भुतेभसम आपताज्जयम् ॥ १० ॥

॥ इति गजवर्णनम् ॥

टिप्पणी–हे नृपतीन्द्र ! तावको गजो जयं 'आपतात्' प्राप्नुयात्, "आप्लृण् लम्भने" यौजादिकः । कां क इव ? पञ्चमीं विभक्तिं 'क्यब्विलोप इव' यथा क्यब्लोपः कर्मणोऽर्थे अधिकरणस्यार्थे च पञ्चमीं विभक्तिं प्राप्नोति तथा गजो जयं प्राप्नुयादित्यर्थः । किम्भूत हे नृपतीन्द्र ! ? क्यः–सूर्यः स इव प्रतापो यस्य स तथा तदामन्त्रणम् । किम्भूतो गजः ? क्यः–अग्निः तेन प्रतप्तो यो घनगोलः–लोहगोलकः तद्वद् ये रक्ता बिन्दवः तैः युग्–युक्तो यः स तथा, रक्तबिन्दुमानित्यर्थः । पुनः किम्भूतो गजः ? किः–इन्द्रः तस्य यः अद्भुतेभः–सम्यग् हस्ती तेन समः–समानो यः स तथा ॥ १० ॥

॥ इति गजवर्णनम् ॥

क्रामति क्षितिपते ! तुरङ्गमः, कृष्टुमाश्वरिभुवं जयावहः ।
कृष्टृवच्चतुरताविराजित !, क्रान्तशक्रतुरगप्रभोदयः ॥ ११ ॥

टिप्पणी–'हे क्षितिपते !' नृप ! 'तुरङ्गमः' अश्वः 'क्रामति' पादविक्षेपं करोति । किं कर्तुम् ? 'आशु' शीघ्रम् 'अरिभुवं' रिपुपृथ्वीं 'कृष्टुं' विलिखितुम् । किंवत् ? 'कृष्टृवत्' कर्षुक इव, यथा कर्षुको भुवं कृष्टुं क्रामति तथा । किम्भूतस्तुरङ्गमः ? जयावहः । किम्भूत हे क्षितिपते ! ? चतुरताविराजित ! । पुनः किम्भूतस्तुरङ्गमः ? क्रान्तः शक्रतुरगस्य–उच्चैःश्रवसोऽश्वस्य प्रभोदयः–शोभोदयो येन स तथा ॥ ११ ॥

क्लेशितातुलबलावलोकनक्लेशकारकविपक्षपक्षकः ।
क्लीबतारहितचेतसां विशां, क्लान्तिकृज्जयति भूपते ! हयः ॥ १२ ॥

टिप्पणी–हे भूपते ! हयो जयति । किम्भूतो हयः ? "क्लेशि बाधने" क्लेशितः अतुलबलावलोकनेन क्लेशकारकविपक्षाणां पक्षो येन स तथा । पुनः किम्भूतो हयः ? क्लीबतारहितचेतसां 'विशां' नृणां क्षान्तिकृत् ॥ १२ ॥

क्वाप्यवस्थितिमसावनाप्नुवन्, काथहा हरिहयो हरिं श्रितः ।
क्वां हयोऽसति यदोजसा जितः, काण एष जगतीति वर्तते ॥ १३ ॥

टिप्पणी–'जगति' लोके 'एषः' प्रत्यक्षः 'काणः' शब्द इति वर्तते । इतीति किम् ? स हयः 'क्वां' पृथ्व्यां 'असति' दीप्यते । स कः ? यदोजसाऽसौ 'हरिहयः' उच्चैःश्रवाः जितः सन् क्वापि अवस्थितिमनाप्नुवन् 'हरिम्' इन्द्रं 'श्रितः' आश्रितः । किम्भूतो हयः ? 'काथहा' दुःखहा ॥ १३ ॥

ख्यातकीर्तिरसकौ हयो वरः, ख्याति खल्वविकलं जयं तव ।
ख्यातिमन् नृप! सुलालिकामिषैः, ख्यान्ति पण्डितजना इति स्फुटम् ॥१४॥

टिप्पणी–पण्डितजना इति स्फुटं 'ख्यान्ति' कथयन्ति । इतीति किम् ? हे नृप ! असकौ हयः तव 'खलु' निश्चितं अविकलं जयं 'ख्याति' आचष्टे । कैः ? 'सुलालिका-मिषैः' शोभनलालाव्याजैः । किम्भूतो हयः ? ख्यातकीर्तिः । पुनः किम्भूतो हयः ? वरः । किम्भूत हे नृप ! ? ख्यातिमन् ! ॥ १४ ॥

ख्रक्ष्मापतिततिप्रणाशक !, ख्राधिनाथ ! विचरंस्तुरङ्गमः ।
ख्रं प्रयच्छति तवारिसन्ततेः, ख्रं विनैव कुतुकं त्विदं महत् ॥ १५ ॥

टिप्पणी–'हे ख्राधिनाथ !' हे भूपाल ! तुरङ्गमः विचरन् सन् तवारिसन्ततेः 'ख्रं' खड्गं विनैव 'ख्रं' मरणं प्रयच्छति, इदं महत् कुतुकम् । किम्भूत हे ख्राधिनाथ ! ? ख्राः–दुष्टहृदयाः ये क्ष्मापतयस्तेषां ततिस्तस्याः प्रणाशकस्तदामन्त्रणम् ॥ १५ ॥

ख्लावली छलति तावदुद्बलं, ख्लावलीव सकलं प्रजाबलम् ।
ख्लाकुला खलु मिलत्यहो ! न भूख्लापते ! तव हयः पुमानिव ॥१६॥

टिप्पणी–भूरेव ख्ला–स्त्री तस्याः पतिस्तदामन्त्रणं हे भूख्लापते ! । 'ख्लावली' दुर्जनश्रेणिः 'उद्बलम्' उत्कृष्टबलं सकलं प्रजाबलं तावत् छलति, यावदिति पदमध्याहार्यम्, 'अहो !' इत्याश्चर्ये, 'खलु' निश्चितं तव हयः पुमानिव न मिलति ॥ १६ ॥

ग्याङ्गजावितवराः सुवागरा, ग्यं यदीयमनिशं स्तुवन्त्यरम् ।
ग्यद्भुतोदितजय! प्रदीप्यते, ग्यद्विषन् ! स तुरगो महीपते ! ॥ १७ ॥

ग्रस्तसङ्गररुजां सुभूभुजां, ग्रावराजसमधैर्यसंयुजाम् ।
ग्रासवन्मदकरोऽरिसम्पदा, ग्राममाशु हरतीश ! ते हयः ॥ १८ ॥

॥ इति अश्ववर्णनम् ॥

ग्लानतारहितपीनभूघनो, ग्लौलसत्किरणकोटितुल्यरुक् ।
ग्लायति प्रबलमाश्वशं यतो, ग्लौगुणेश ! नृप ! भाति गौः स ते ॥१९॥

ग्वः प्रदीप्यत इलापतेऽनिशं, ग्वावलीषु सबलोऽमलाङ्गरुक् ।
ग्वाधिनाथ ! वृषभप्रभोदयो, ग्वद्भुताङ्ग ! वसुधापते ! तव ॥ २० ॥

घ्नप्रदाभनिनदो नदन्नरं, घ्नातिदीसिततियुक् ककुद्युतः ।
घ्नोऽतिदुष्कृततर्तेर्विराजते, घ्नामणिप्रतिभ ! भूप ! ते वृषः ॥ २१ ॥

घ्याशयान्तरसिताङ्गदीधितिर्घ्यद्भुतेद्धजनचित्तहर्षदः ।
घ्यादिदेवविसराः स्तुवन्त्यरं, घ्यर्क्यरुग् यमसते वृषः सकः ॥ २२ ॥

घ्रप्रभो ! गुणसुमङ्गलश्रिया, घ्रं वरं प्रविदधान इन्दति ।
घ्राणभूषणयुतो महातनुर्घ्रानन ! क्षितिप ! तावको वृषः ॥ २३ ॥

घ्लारोहसन्दोहफलीकृताज्ञ !, घ्लौजोविराजी नृप ! राजते ते ।
घ्लोर्जस्व्यनड्वान् वृषभो वृषेभो,घ्लालीलसल्लक्षणलुब्धचेतः ॥ २४ ॥

घ्वेतिनिस्वनमिषेण मेघजं, घ्वं जयंश्च विदधाति ते स्तुतिम् ।
घ्वीश्वर ! त्वदतनुस्फुरद्गुणघ्वादनेन सुमना वृषोऽसकौ ॥ २५ ॥

ङ्गाधिनाथ ! जनयत्ययं वृषोऽङ्गप्रधानमुदमुत्तमां नृणाम् ।
ङ्गावलीं शरणदायकाग्रणीर्ङ्गोद्धुरो रथधुरन्धरोत्तरः ॥ २६ ॥

च्यावयन् धवलपद्ममण्डलीं, च्योतिताऽपरसितार्थकान्तिभिः ।
च्यावयत्यतनुभारमुद्धुरां, च्यातिसुन्दरगते ! महीपते ! ॥ २७ ॥

॥ इति वृषभवर्णनम् ॥

च्रावलीस्तुतगुणौघ ! भूपते ! च्रातिचञ्चुरमहौजसो हरिः ।
च्रापवर्जित उदारसारयुक्, च्रोदितस्य विश एति सम्मदम् ॥ २८ ॥

छ्योघं यथा चित्रक आशु तुष्यच्छ्यामाङ्गरोचिर्हरति प्रकामम् ।
छ्यारञ्जकोर्वीश!हरिस्तथाऽयं,छ्याढ्यस्त्वदीयो रिपुहस्तिवृन्दम्॥२९॥

छ्रू इव हन्ति तिरश्च इमां ततिं, छ्रूवियुतो नृपते ! नखरायुधः ।
छ्रूततिनाशविधिप्रवणक्रमः, छ्रूरहिताद्भुतवर्णमणीगण ! ॥ ३० ॥

छ्लोत्कटान् प्रकटकान् सदोल्लसच्छ्लक्ष्णलक्ष्मिकलितानरिद्विपान् ।
छ्लायुतो हरिरयं हिनस्त्यलच्छिष्टकीर्तिकमलाऽचलापते ! ॥ ३१ ॥

छ्वावन् ! महीपाल ! महाबलिष्ठ !, छ्वाद्यासुमत्पालनसावधान ! ।
छ्वज्ञप्ति-मूर्त्ते ! तव भाति भास्वच्छ्वासो हरिः प्राज्ञजनाऽर्कणीयः ॥३२॥

टिप्पणी—छ्वा—छविर्विद्यते यस्य स छ्वावान् तदामन्त्रणम् । छ्वः—छाग आद्यो येषां ते छ्वाद्याः, ते च ते असुमन्तश्च—प्राणिनः छ्वाद्यासुमन्तः, तेषां पालने सावधानो यः स तथा तदामन्त्रणम् । छ्वे—स्वच्छे ज्ञप्ति-मूर्ती यस्य स तथा तत्सम्बोधनम् । ज्ञप्तिः—बुद्धिः ॥३२॥

ज्यायानसौ भाति हरिस्त्वदीयो, ज्यायामतो नास्त्यपरो बलीयान् ।
ज्यानाथविख्यातयशः ! प्रधानेज्यः शोभमानौष्ठविशिष्टवक्त्रः ॥ ३३ ॥

टिप्पणी—'ज्यानाथविख्यातयशः !' भूनाथख्यातकीर्त्ते ! । 'प्रधानेज्यः' शोभनपूजः ॥ ३३ ॥

ज्र्ज्वालिकातापितहेम-विद्युज्ज्रोद्भासिनेत्रो वरपीवरोरुः ।
ज्रं राजते त्वद्धरिरेष दिव्यो, ज्रश्रीतिरस्कृत्कमलाऽचलेश ! ॥ ३४ ॥

टिप्पणी—ज्र्ज्वालिकाभिः—अग्निज्वालाभिस्तापितं यद् हेम ज्र्ज्वालिकातापितहेम, तच्च विद्युच्च ज्र्ज्वालिकातापितहेमविद्युतौ, तयोरिव ज्रोद्भासिनी—वृद्धदीप्यमाने नेत्रे यस्य स तथा, पीतनेत्रत्वात् सिंहस्य । 'ज्रम्' अजस्रम् । 'ज्रश्रीतिरस्कृत्कमल !' कृष्णश्रीतिरस्कृत्कमल ! । 'अचलेश !' हे महीश ! ॥ ३४ ॥

ज्वालावलीदुस्सहसत्प्रताप !, ज्वाक्रान्तभूपालकलाऽचलेश ! ।
ज्वालाऽऽभचक्षू रसनाऽतिरक्ता, ज्वा दीप्यते यस्य हरिः सकस्ते ॥ ३५ ॥

टिप्पणी—ज्वेन—वेगेन आक्रान्ता भूपालानां कला येन स तथा तदामन्त्रणम् । 'अचलेश' हे भूप ! । ज्वालाभे—ज्वालासदृक्षे चक्षुषी यस्य स तथा । किम्भूता रसना ? 'ज्वा' चञ्चला, लपलपायमानत्वात् । 'ते' तव ॥ ३५ ॥

झ्यानाथतीरे तव यस्य कीर्तिं, झ्यौघाकुले गायति देववृन्दः ।
झ्यैश्वर्यमेकाकिनमाप्नुवन्तं, झ्याढ्याऽवनीनाथ ! हरिं स पश्य ॥ ३६ ॥

टिप्पणी—हे 'अवनीनाथं !' भूपाल ! स त्वं 'हरिं' सिंहं 'पश्य' विलोकय । किं कुर्वन्तं हरिम् ? 'आप्नुवन्तं' प्राप्नुवन्तम् , किं तत् ? 'इयैश्वर्यं' हस्त्याधिपत्यम् । इशब्द ईबन्तो हस्तिवाचक एकाक्षरकोषे [सौ. ए. को. श्लो. ४१]। किंविशिष्टं हरिम् ? एकाकिनम् । स त्वं पश्य । स इति कः ? यस्य तव 'कीर्तिं' यशः देववृन्दो गायति । क ? इयानाथतीरे इयाः—नद्यः तासां नाथो इयानाथः—समुद्रः तस्य तीरे—तटे । किम्भूते ? 'इयौघाकुले' इयानां—द्रहाणाम् ओघः—वृन्दं तेनाऽऽकुलो यः स तथा तस्मिन् । किम्भूत हे अवनीनाथ ! ? 'इयाढ्य !' कलाढ्य ! । इदन्तो झिशब्दः कलावाचकः [सौ. ए. को. श्लो. ४०] ॥ ३६ ॥

झ्नां करोत्यरिमृगावलेर्नृप !, झ्नोर्जधार्यऽविरतं मृगाधिपः ।
झ्न-स्थिर-प्रवर-वृत्तदंष्ट्रिको, झ्नातिमुक्तवरकेसरच्छटः ॥ ३७ ॥

टिप्पणी—'झ्नां' हानिम् । 'मृगाधिपः' सिंहः । किम्भूतो मृगाधिपः ? 'झ्नोर्जधारी' कठोरबलधारी । ऊर्जशब्दो बलवाची अदन्तोऽप्यस्ति । पुनः किम्भूतो मृगाधिपः ? झ्नाश्च—पुष्टाः स्थिराश्च प्रवराश्च वृत्ताश्च दंष्ट्रा विद्यन्ते यस्य स तथा । पुनः किम्भूतो मृगाधिपः ? झ्ना—जरा तयाऽतिशयेन मुक्तः—रहितो य स झ्नातिमुक्तः, स चासौ वरकेसरच्छटश्च झ्नारहित(झ्नातिमुक्त)वरकेसरच्छटः ॥ ३७ ॥

झ्वाधवादिमुनिसङ्घसेवक !, झ्वौघचित्तमददायिकीर्तिसन् ! ।
झ्वाद्मरो नर इवाऽलते बली, झ्वङ्कहृन्नरपते ! हरिस्तव ॥ ३८ ॥

टिप्पणी—हे नरपते ! तव 'हरिः' सिंहः 'अलते' शोभते । किम्भूतः सन् ? 'बली' बलवान् । क इव ? 'झ्वाद्मरः' दधिभोक्ता नर इव, यथा दधिभोक्ता मर्त्यः बली शोभते तथा । किम्भूत हे नरपते ! ? झ्वा—अरुन्धती तस्या धवः—भर्ता झ्वाधवः—वसिष्ठः, स आदिर्येषां ते झ्वाधवादयः, ते च ते मुनयः तेषां सङ्घः तस्य सेवकः, तदामन्त्रणम् । झ्वुशब्देन देवाः, तेषां ओघस्तस्य चित्तमददायिनी या कीर्तिः तया सन्—प्रधानः, तदामन्त्रणम् । झ्वुश्च—शोकः अङ्कं च—दुःखं ते हरतीति किपि झ्वङ्कहृत्, तदामन्त्रणम् ॥ ३८ ॥

ञ्युत्तमोच्छ्वसितपुच्छशोभितो, ञ्यग्रणीड्य ! नरनाथ ! तावकः ।
ञ्यारहाश्च रमणीयवीक्ष्यकृद्, ञ्याभताप ! रमतेतरां हरिः ॥ ३९ ॥

टिप्पणी—हे नरनाथ ! तावको हरिः रमतेतराम् । किम्भूतो हरिः ? ञिशब्देन ज्ञानवृद्धाः [सौ. ए. को. श्लो. ४३], तेषूत्तमः तत्सम्बोधनम् । उच्छ्वसित—उदग्र । पुनः किम्भूतो हरिः ? ञिशब्देन सम्राजः [सौ. ए. को. श्लो. ४३], तेषु अग्रण्यः तेषां ईड्यः—स्तुत्यः, तदामन्त्रणम् । ञि—सम्राट्, तच्च तदारं च ञ्यारम्, तद् हन्तीति

ञ्यारह्वा, "क्विप्" [सि. ५।१।१४८] इत्यनेन क्विप् । वीक्ष्यम्—आश्चर्यं करोतीति वीक्ष्यकृद्, रमणीयश्चासौ वीक्ष्यकृच्च०, सिंहस्यैतद् विशेषणद्वयम् । ञिः—अग्निः तदाभः तापः—प्रतापो यस्य स तथा तदामन्त्रणम् ॥ ३९ ॥

ञ्रावलीक्षितिविधानतत्पर !, ञ्राऽभिरञ्जितमहाप्रजाऽरजः ! ।
ञ्राऽभिभूतगजराज ! राजते, ञ्राभियुक्त ! हरिरेष तावकः ॥ ४० ॥

टिप्पणी—ञ्रावली—चौरश्रेणिः । ञ्राभिरञ्जित—नीत्यभिरञ्जित । अरजः !—निष्पाप ! । ञ्राभिभूत—गतिजित । 'ञ्राभियुक्त !' हे नीतिसहित नृप ! ॥ ४० ॥

ट्यानाथ ! दंष्ट्रातिविडम्बितास्यं, ट्याघूर्मितं पश्य सुदृश्यशौर्यम् ।
ट्यालीबलं स्राक् खलु नाशयन्तं, ट्योघारिमेनं मृगराजमग्रम् ॥४१॥

टिप्पणी—ट्या—पृथ्वी तस्या नाथः—स्वामी ट्यानाथः, तत्सम्बुद्धौ 'हे ट्यानाथ !' भूपते ! एनं 'मृगराजं' सिंहं 'पश्य' विलोकय । किं कुर्वन्तम् ? 'खलु' निश्चितम्, टीनां—करेणूनां आली—राजी ट्याली, तस्या बलं—स्थाम तत् 'स्राक्' शीघ्रं नाशयन्तम् । किम्भूतम् ? दंष्ट्राभिरतिशयेन विडम्बितम्—अलङ्कृतं आस्यं—मुखं यस्य स तथा तम् । पुनः किम्भूतम् ? ट्या—सुरा तया घूर्मितो यः स तथा तम् । पुनः किम्भूतम् ? सुतरां दृश्यं—विलोकनीयं शौर्यं—पराक्रमो यस्य स तथा तम् । पुनः किम्भूतम् ? टीनां—गजानां ओघः तस्यारिर्यः स तथा तम् । 'अग्रम्' श्रेष्ठम् ॥ ४१ ॥

ट्रूस्थित ! क्षितिपते ! गजावलीट्रारवोत्करविराजि राज्यकम् ।
ट्रेतिशब्दवरटोत्करोत्करट्राग्रहस्ति तयुदेति तस्य ङोः ॥ ४२ ॥

टिप्पणी—'हे ट्रूस्थित !' सिंहासनस्थ ! 'हे क्षितिपते !' नृप ! तस्य 'ते' तव 'ङोः' सिंहः 'उदेति' उदयं प्राप्नोति । तस्य कस्य ? यत्तदोर्नित्याभिसम्बन्धाद् यस्य 'राज्यकं' राज्यं राजत इति शेषः । किम्भूतम् ? गजावल्या यः ट्र् ट्र् इति आरवः तस्य उत्करः—वृन्दं तेन विराजि यत् तत् तथा । पुनः किम्भूतम् ? 'ट्रेतिशब्द०' टं इति शब्दं उत्—प्राबल्येन करोतीति टोत्करः, लोके 'टोकरउ' इति प्रतीतिः, ट्रेतिशब्देन वरः—श्रेष्ठः ट्रेतिशब्दवरः, स चासौ टोत्करश्च ट्रेतिशब्दवरटोत्करः, तस्य उत्करः—वृन्दं तस्य यत् ट्रं—शब्दविशेषः तेन अग्राः—श्रेष्ठा हस्तिनो यत्र तत् तथा ॥ ४२ ॥

ट्वाक्षिजन्ममुख ! मुख्यसम्पद !, ट्वेन्द्रियायतन ! भूप ! तावकी ।
ट्वेव सुप्तिसमये रणे सुखं, ट्वं करोति हरिराजिरेषका ॥ ४३ ॥

टिप्पणी—हे भूप ! तावकी 'एषका' एषा 'हरिराजिः' सिंहावली 'रणे' सङ्ग्रामे सुखं करोति । किम्भूतं सुखम् ? 'ट्वम्' पुष्टं क्षयाभावात् । कस्मिन् केव ? 'सुप्तिसमये'

शयनकाले 'ट्वेव' खट्वेव, यथा खट्वा शयनकाले सुखं करोति तथैषाऽपि। किम्भूत हे भूप!? ट्वः—अत्रिः तस्य अक्षि—नेत्रं ततो जन्म—जननं यस्य सः ट्वाक्षिजन्मा—चन्द्रः, तद्वन्मुखं यस्य स तथा तदामन्त्रणम्। ट्वं—पुष्टं इन्द्रियायतनं—कायो यस्य स तथा तदामन्त्रणम्॥ ४३॥

ठ्यप्रताप! वसुधापते! क्षितौ, ठ्यो मनो हरति ते स्वकौजसा।
ठ्यं वदन्ति खलु कोविदा इति, ठ्यग्र! दर्शनभयङ्करानन:॥४४॥

टिप्पणी—'हे ठ्यप्रताप!' दुस्सहत्वाद् वह्निसमानप्रताप! 'हे वसुधापते!' भूप! 'ते' तव मनः 'ठ्यः' हरिः हरति। केन? 'स्वकौजसा' स्वीयबलेन। 'खलु' निश्चितम्। कोविदा इति 'ठ्यं' वाक्यं वदन्ति। ठीः—कुटुम्बवान् पुत्रवान् वा, स चासौ अग्रश्च तदामन्त्रणम्॥ ४४॥

ठ्स्वादवच्चित्तमदप्रदः श्रीठ्राविह्वलद्वेषिमृगप्रणाशी।
ठ्रालीद्धकुम्भस्थलदन्तिभेदी, ठ्रह्लादमीष्टे विदधत् सुसिंहः॥ ४५॥

टिप्पणी—हे नृप! सुसिंहः ईष्टे। किं कुर्वन्? 'ठ्रह्लादं' 'ठ्रम्' इति शब्दं 'विदधत्' कुर्वन्। किम्भूतः सुसिंहः? 'चित्तमदप्रदः' चेतोहर्षदाता। किंवत्? 'ठ्स्वादवत्' मिष्टान्नफलरसास्वादवत्। पुनः किम्भूतः सुसिंहः? श्रीः—लक्ष्मीः सैव ठ्रा—सुरा तया विह्वला ये द्वेषिणः त एव मृगाः तान् प्रणाशयतीत्येवंशीलो यः स तथा। पुनः किम्भूतः सुसिंहः? ठ्राणां—भ्रमरीणां आली—श्रेणिः तया इद्धः—समृद्धः कुम्भस्थलो येषां ते ठ्रालीद्धकुम्भस्थलाः, ते च ते दन्तिनश्च—गजाः तान् भिनत्तीत्येवंशीलो यः स तथा॥ ४५॥

ठ्वार्कणीयगुणगौरव! प्रभो!, ठ्वेज्यया विगतभूरिवैरिराट्!।
ठ्वग्रगीष्पतिमतिक्षितिप्रद!, ठ्वग्र! हर्षयति ते मनो हरिः॥४६॥

॥ सिंहवर्णनम्॥

टिप्पणी—'हे प्रभो!' स्वामिन्! 'ते' तव मनः हरिर्हर्षयति। किम्भूत हे प्रभो!? ठ्वस्य—वसिष्ठऋषेः अर्कणीयं—स्तवनीयं गुणगौरवं यस्य स तथा तदामन्त्रणम्। पुनः किम्भूत हे प्रभो!? 'ठ्वेज्यया' कृष्णपूजया विगतभूरिवैरिराट्!। पुनः किम्भूत हे प्रभो!? ठ्वः—प्रज्ञा तया अग्रः ठ्वग्रः, स चासौ गीष्पतिश्च—बृहस्पतिः तस्य मतिः तस्याः क्षितिं—क्षयं प्रददातीति तथा तदामन्त्रणम्। ठ्वः—धृतिः तया अग्रः ठ्वग्रः, तत्सम्बोधनम्॥ ४६॥

॥ इति सिंहवर्णनम्॥

ड्यप्रमुक्त! वृषरक्त! कोविदेड्यस्फुरद्गुणगण! क्रमेलकः।
ड्यं द्विषां गतिविलोकनात् क्षणात्, ड्यर्यभक्त! तनुते महातनुः॥४७॥

टिप्पणी—हे 'ड्यप्रमुक्त !' जाड्यरहित !, 'वृषरक्त !' धर्मनिरत !, कोविदानां ईड्यः—स्तवनीयः स्फुरद्गुणगणो यस्य स तथा तदामन्त्रणम्। 'क्रमेलकः' उष्ट्रः 'द्विषां' वैरिणां 'ड्यं' जाड्यं तनुते । कस्मात् ? 'क्षणात्' क्षणमात्रेण गतिविलोकनात् । डिः—गौरी तस्या अर्यः—स्वामी ड्यर्यः—शम्भुः, तस्य भक्तः तदामन्त्रणम् । किम्भूतः क्रमेलकः ? 'महातनुः' महाकायः ॥ ४७ ॥

डूदायकाऽनीतिमतां जनानां, डूमानवव्राजमतल्लिकस्य ।
डूनेत्र ! भूपेन्द्र ! तवावनीं स्राग्, डूमुख्य आक्रामति केलिकीर्णः ॥४८॥

टिप्पणी—हे भूपेन्द्र ! तव 'केलिकीर्णः' उष्ट्रः स्राग् अवनीं आक्रामति । किम्भूतः केलिकीर्णः ? 'डूमुख्यः' दूरगामिश्रेष्ठः । किम्भूत हे भूपेन्द्र ! ? अनीतिमतां जनानां 'डूदायक !' दण्डदातः ! । किम्भूतस्य तव ? 'डूमानवव्राजमतल्लिकस्य' दक्षमनुष्यनिकरश्रेष्ठस्य । डूं—कमलं तत्तुल्ये नेत्रे—लोचने यस्य स तथा तदामन्त्रणम् ॥ ४८ ॥

ड्वामण्डलीमण्डितवक्त्र उष्ट्रो, ड्वो दीप्यते भूप ! तवैष वृद्धः ।
ड्वाभाननाऽतुल्यशरीरदीप्तिड्वीशान-डिण्डीरविशुद्धकीर्ते ! ॥ ४९ ॥

टिप्पणी—हे भूप ! तव एष उष्ट्रः दीप्यते । किम्भूत उष्ट्रः ? ड्वामण्डल्या—दाढाश्रेण्या मण्डितं वक्त्रं यस्य स तथा । पुनः किम्भूत उष्ट्रः ? 'ड्वः' महोदरः । किम्भूत हे भूप ! ? ड्वः—चन्द्रः तदाभं—तत्सदृक्षं आननं यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? 'अतुल्यशरीरदीप्तिः' अतुल्या—उच्चनीचा शरीरदीप्तिः—कायशोभा यस्य स तथा । किम्भूत हे भूप ! ? ड्वश्च—चन्द्रः ईशानश्च—ईश्वरः डिण्डीराश्च—फेनाः ड्वीशानडिण्डीराः, त इव विशुद्धा कीर्तिर्यस्य स तथा तदामन्त्रणम् ॥ ४९ ॥

ढ्याधीश ! धीश ! विदधातु तव प्रमोदं,
ढ्यायुक्त एष करभः शुभलक्षणाढ्यः ।
ढ्याभृद् गुहस्य इव दिव्यकलाकलापा-
ढ्यस्य प्रशस्यबहलश्रिय ईड्यमूर्त्तेः ॥ ५० ॥

टिप्पणी—'हे ढ्याधीश !' महीश ! 'हे धीश !' धीनाथ ! एषः 'करभः' उष्ट्रः तव प्रमोदं विदधातु । कस्य क इव ? 'गुहस्य' स्कन्दस्य, ढ्यां—गङ्गां बिभर्तीति 'ढ्याभृद्' महेशः स इव, यथा महेशः गुहस्य प्रमोदं करोति तथा । किम्भूतः करभः ? ढ्या—रमा बलसम्पदित्यर्थः, तया युक्तः । महेशपक्षे—ढ्या—विभूतिश्रीः तया युक्तः । पुनः किम्भूतः करभः ? शुभलक्षणाढ्यः, पक्षे श्रेयोलक्षणसमृद्धः । किम्भूतस्य तव ? दिव्यकलाकलापाढ्यस्य, गुहपक्षेऽप्येवमेव । पुनः किम्भूतस्य ? प्रशस्यबहलश्रियः, पक्षेऽप्येवमेव । पुनः किम्भूतस्य ? ईड्यमूर्तेः, पक्षेऽपीत्थमेव ॥ ५० ॥

ढ्वारिः पथं लङ्घयति क्षणेनाऽढ्रो लम्भजङ्घश्च सुदुर्गलङ्घी ।
ढ्राधीश ! भूमीश ! तवैष उष्ट्रो, ढ्रापद्विनिर्मुक्त ! समस्तशत्रुः ॥५१॥

टिप्पणी–हे भूमीश ! तव एष उष्ट्रः क्षणेन 'पथं' मार्गं लङ्घयति, पथशब्दोऽकारान्तोऽपि । किम्भूत उष्ट्रः ? ढ्रः–भ्रष्टा नष्टा इति यावद् अरयो यस्मात् स तथा । तथा ढ्रं–फल्गु अभव्यमित्यर्थः, न ढ्रो 'अढ्रः' भव्यः सुखकारीत्यर्थः । 'ढ्राधीश ! विदुराधीश ! । 'ढ्रापद्विनिर्मुक्त !' मरणापद्रहित ! । 'समस्तशत्रुः' सम्यग्हृतरिपुः ॥५१॥

ढ्लिस्तुत्यलक्ष्मीर्बलवान् क्रमेलो, ढ्लानाथ ! ते चित्तमुदं दधाति ।
ढ्लः केशवस्येव विशालभाल ! ढ्लह्राद ! राजेन्द्र ! गिरीन्द्रधीर ! ॥ ५२ ॥

टिप्पणी–'हे ढ्लानाथ !' भूप ! 'क्रमेलः' उष्ट्रः 'ते' तव चित्तमुदं दधाति । कस्य क इव ? 'केशवस्य ढ्ल इव' यथा 'ढ्लः' गरुडः केशवस्य चित्तमुदं दधाति तथा । किम्भूत हे ढ्लानाथ ! ? ढ्लिः–देवेशः तस्य स्तुत्या लक्ष्मीर्यस्य स तथा तदामन्त्रणम् । [पुनः किम्भूत हे ढ्लानाथ ! ?] 'ढ्लह्राद !' मधुरारव ! ॥ ५२ ॥

ढ्वाभसद्गुण ! गुडा-ऽऽज्यभोजनाद्, ढ्वोजहस्य बलमुष्ट्रकस्य ते ।
ढ्वाभपद् ! भवति भूपते ! महद्, ढ्वादनाद् विश इव प्रतिप्रगम् ॥५३॥

टिप्पणी–हे भूपते ! 'ते' तव उष्ट्रकस्य 'प्रतिप्रगं' प्रतिप्रभातं 'बलं' स्थाम महद् 'भवति' जायते । कस्मात् ? गुडा-ऽऽज्यभोजनात् । कस्य कस्मादिव ? 'विशः' मनुष्यस्य 'ढ्वादनादिव' दधिभोजनादिव, यथा मनुष्यस्य दधिभोजनाद् बलं महद् भवति तथा । किम्भूत हे भूपते ! ? ढ्वं–दुग्धं तदाभाः–तत्समाः सन्तो गुणा यस्य स तथा तदामन्त्रणम् । किम्भूतस्य उष्ट्रकस्य ? ढ्वः–व्यालः तस्य ओजं–बलं हिनस्तीति ढ्वोजहः, डप्रत्ययः, तस्य, ओजशब्दोऽकारान्तोऽपि । किम्भूत हे भूपते ! ? ढ्वः–कूर्मः तदाभौ पादौ यस्य स तथा, तदामन्त्रणं हे ढ्वाभपत् ! ॥ ५३ ॥

ण्यानाथगम्भीर ! नराधिपाग्रण्यर्च्यांह्रियुग्मोष्ट्र उदाररावः ।
ण्यारञ्जितस्फारसभ ! प्रभाति, ण्यर्यार्क्यलक्ष्मी ! रिपुहृत्प्रभेदी ॥५४॥

टिप्पणी–ण्या–नदी तस्या नाथः–समुद्रः तद्वद् गम्भीरो यः स तथा तदामन्त्रणं हे ण्यानाथगम्भीर ! हे नृप ! उष्ट्रः प्रभाति । किम्भूत हे नृप ! ? नराधिपाग्रणीनां–भूपश्रेष्ठानाम् अर्च्यं–पूजनीयम् अंह्रियुग्मं यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? 'उदाररावः' उत्कटशब्दः । ण्या–वाणी तया रञ्जिता स्फारसभा येन स तथा तदा-

---

१ आदर्शे तु **ढ्लाराट् ! तव स्वान्तमुदं दधाति** इति पाठभेदोऽपि दृश्यते । तथा **'ढ्लाराट् !' भूनाथ !** इति शब्दार्थोऽप्यादर्शे निर्दिष्टो वर्तते ॥

मन्त्रणम् । णीः—स्वर्गः तस्या अर्यः—स्वामी ण्यर्यः—इन्द्रः तस्य अर्क्या—स्तुत्या लक्ष्मीर्यस्य स तथा तदामन्त्रणम् । किम्भूत उष्ट्रः ? रिपुहृत्प्रभेदी ॥ ५४ ॥

णरापन्महीपाऽऽरटनेन दस्यून्, णराढ्यांश्च संज्ञापयतीति उष्ट्रः ।
णरौघप्रदेन प्रमदेन राज्ञाऽणरेनौजसा भोः ! विजिता भवन्तः ॥ ५५ ॥

टिप्पणी—'णरापत् !' नष्टापत् ! हे महीप ! उष्ट्रः 'आरटनेन' शब्दविशेषेण दस्यून् इति संज्ञापयति । किम्भूतान् दस्यून् ? 'णराढ्यान्' लक्ष्म्याढ्यान् । इतीति किम् ? 'भोः !' दस्यवः ! भवन्तो विजिताः । केन ? राज्ञा । केन ? 'ओजसा' बलेन । किम्भूतेन राज्ञा ? 'णरौघप्रदेन' उत्सववृन्ददात्रा । पुनः किम्भूतेन ? 'प्रमदेन' वरहर्षेण गताहङ्कारेण वा । पुनः किम्भूतेन ? 'अणरेन' अभीरुणा ॥ ५५ ॥

णवाभिभूतरतिनाथ ! मानवणव ! द्विषां बलमलं बलाद्धर ।
णवायुतेति रटति त्वदुष्ट्रको, णवर्य ! भास्वरचमूसमन्वितः ॥ ५६ ॥

॥ उष्ट्रवर्णनम् ॥

टिप्पणी—'णवाभिभूतरतिनाथ !' रूपजितकन्दर्प ! । मानवानां—नृणां णवः—स्वामी यः स तथा तदामन्त्रणं 'हे मानवणव !' हे राजन् ! त्वं द्विषां बलं 'अलम्' अत्यर्थं बलाद् हर, इति त्वदुष्ट्रको रटति । 'णवायुत !' प्रभासहित ! । 'णवर्य !' भूनाथ ! ॥ ५६ ॥

॥ इति प्रथमपरिच्छेदावचूर्णिः ॥ १ ॥

॥ इति श्रीखरतरगच्छीयश्रीज्ञानविमलोपाध्यायमिश्रशिष्य-
वाचनाचार्यश्रीवल्लभगणिकृते विद्वत्प्रबोधनाम्नि
शास्त्रे गजा-ऽश्व-वृष-सिंहोष्ट्रवर्णनो नाम
प्रथमः परिच्छेदः समाप्तः ॥

॥ द्वितीयः परिच्छेदः ॥

परिच्छेदे द्वितीयेऽथो शुकप्रभृतिपक्षिणाम् ।
वर्णनं क्रियते सम्यक् चरणद्वयधारिणाम् ॥ १ ॥

त्यापते ! तव विजोततेतरां, त्यार्चकप्रवर ! कीर एषकः ।
त्यार्चनोदितविभूतिसन्ततेऽन्त्येतरोत्तरसुनीलदीधितिः ॥ २ ॥

टिप्पणी—त्या—पृथ्वी तस्याः पतिः 'त्यापतिः' नृपः, तदामन्त्रणं हे त्यापते ! तव 'एषकः' एष कीरः 'विजोततेतराम्' अतिशयेन दीप्यते । किम्भूत हे त्यापते !? त्याः—गुरवः तेषामर्चकाः तेषु प्रवरः तदामन्त्रणम् । पुनः किम्भूत हे त्यापते !? त्यः—कृष्णः तस्य अर्चनेनोदिता विभूतिसन्ततिर्यस्य स तदामन्त्रणम् । पुनः किम्भूत हे त्यापते !? अन्त्याः—अधमाः तेभ्य इतरे अन्त्येतरे, तेषूत्तरो यः स तदामन्त्रणम् । किम्भूतः कीरः ? सुतरां नीला दीधितिर्यस्य स तथा ॥ २ ॥

त्रातवानशरणान् जनान् यकः, त्राणदस्य नृपतेश्च तस्य वै ।
त्रातनुः सुखयति प्रमोददः, त्रातरेष सवयः ! शुकोऽनकः ॥ ३ ॥

टिप्पणी—'हे सवयः !' मित्र ! 'तस्य' नृपतेः एष शुकः 'सुखयति' सुखं करोति । तस्य कस्य ? 'यकः' नृपोऽशरणान् जनान् 'त्रातवान्' रक्षितवान् । किम्भूतस्य तस्य ? त्राणदस्य । पुनः किम्भूतस्य तस्य ? 'त्रातनुः' कष्टाद् रक्षितनरस्य । किम्भूत हे सवयः !? 'त्रातः !' पालक ! । किम्भूतः शुकः ? प्रमोददः । पुनः किम्भूतः शुकः ? 'अनकः' दुःखरहितः ॥ ३ ॥

त्वेषते तव महीपते ! शुकः, त्वेष्टुमद्भुतमनोकहं परः ।
त्विट्पटुः पटुकटप्रमोददः, त्वष्टृसत्करततप्रतापभाक् ॥ ४ ॥

टिप्पणी—हे महीपते ! तव शुकः 'त्वेषते' शोभते । किम्भूतः शुकः ? अद्भुतं 'अनोकहं' वृक्षं 'त्वेष्टुं' शोभां कर्तुं 'परः' सावधानः । पुनः किम्भूतः शुकः ? त्विट्पटुः । किम्भूत हे महीपते !? पटूनां कटं—भृशं प्रमोदं ददाति तदामन्त्रणम् । पुनः किम्भूत हे महीपते !? त्वष्टृसत्करवत्—सूर्यकिरणवत् ततं प्रतापं भजते यः सः क्विपि तदामन्त्रणम् ॥४॥

थ्यर्य ! राजति शुकः सुखकारी, थ्यानिवेदनविशारदमुख्यः ।
थ्यो विशामिव वरो मददायी, थ्यर्कणीयकगभीरसुवर्णः ॥ ५ ॥

टिप्पणी—'हे थ्यर्य !' भूनाथ ! शुको राजति । किम्भूतः ? सुखकारी । क इव ? 'विशां' नृणां 'थ्य इव' स्वामीव, यथा नृस्वामी सुखकारी भवति तथा । किम्भूतः ? थ्या—कथा तस्या निवेदने विशारदाः तेषु मुख्यः, पक्षेऽप्येवमेव । पुनः किम्भूतः ?

वरः । पुनः किम्भूतः ? मददायी । पुनः किम्भूतः ? थीः—समुद्रः स इव अर्कणीयकः—गभीरसुवर्णो यस्य स तथा ॥ ५ ॥

आत्मा शुको रञ्जयति प्रधानं, आनाथ ! भूनाथ ! मनस्त्वदीयम् ।
आर्चाविधानोदितपापशुद्धे !, आ-ऽऽमोददाता विदुषां नराणाम् ॥६॥

टिप्पणी—हे भूनाथ ! शुकस्त्वदीयं मनो रञ्जयति । किंविशिष्टः शुकः ? अः—पवित्र आत्मा यस्य स तथा । किम्भूतं मनः ? प्रधानम् । किम्भूत हे भूनाथ ! ? आ—लक्ष्मीः राज्यसम्पत् तस्या नाथः तदामन्त्रणम् । पुनः किम्भूत हे भूनाथ ! ? आणां—तीर्थानाम् अर्चा—पूजा प्रस्तावाद् यात्रा तस्या विधानेन उदिता—आविर्भूता पापशुद्धिर्यस्य स तथा तदामन्त्रणम् । पुनः किम्भूतः शुकः ? अं—सुखम् आमोदश्च—हर्षः तयोर्दाता । केषाम् ? विदुषां नराणाम् ॥ ६ ॥

थ्विन्द्रधीर ! नरवीर ! पीवरः, थ्वाऽयुतो जयति तावकः शुकः ।
थ्वीश्वरः प्रवरनीलवर्णरुक्, थ्वाकथाकथनसावधानधीः ॥ ७ ॥

टिप्पणी—थुः—पर्वतः तन्मध्ये इन्द्र इव महत्त्वात् थ्विन्द्रः, तद्वद् धीरः तदामन्त्रणं हे थ्विन्द्रधीर ! हे नरवीर ! तावकः शुको जयति । किम्भूतः शुकः ? पीवरः । पुनः किम्भूतः ? थ्वेन-मैथुनेन न युतः—न सहितः थ्वाऽयुतः, अतिकामुकत्वाभावात् । पुनः किम्भूतः शुकः ? थूनां—साक्षिणां ईश्वर इव थ्वीश्वरः, तिर्यक्त्वेऽप्यतिनिपुणत्वात् । पुनः किम्भूतः शुकः ? प्रवरनीलवर्णा रुक्—कान्तिर्यस्य स तथा । पुनः किम्भूतः शुकः ? थ्वानां—स्त्रीणां कथाकथने सावधाना प्रधानत्वाद् धीर्यस्य स तथा ॥ ७ ॥

द्योतमानकलकौशलशाली, द्योततेऽतिचतुरस्तव कीरः ।
द्यामते ! नरपते ! सुमुदोको !, द्योपतिस्तुतयशस्सुयशःपते ![1] ॥ ८ ॥

टिप्पणी—हे नरपते ! तव कीरः द्योतते । किम्भूतः कीरः ? द्योतमानं यत् कलं कौशलं तेन शालते इत्येवंशीलो यः स तथा । पुनः किम्भूतः कीरः ? अतिचतुरः । किम्भूत हे नरपते ! ? द्या—दया तत्र मतिर्यस्यासौ तथा तदामन्त्रणम् । पुनः किम्भूत० ? 'हे सुमुदोकः !' हर्षालय ! । द्योपतिः—इन्द्रः । 'हे सुयशःपते !' हे वरप्रतापपते ! ॥ ८ ॥

द्राणशौर्य-जयमञ्जुलश्रियो, द्रान्ति भूप ! तव दस्यवो भुवः ।
द्रव्यवन्निति निवेदयत्ययं, द्रष्ट्रिनो वरगिरा शुकोऽपशुक् ॥ ९ ॥

---

१ यद्यप्यत्र आदर्शे 'यशस्सुयशःपते ! इत्येव पाठस्तदनुसारिणी च व्याख्या वरीवृत्यते, तथापि छन्दोभङ्गभावाद् वास्तवरूपेण 'यशो ! यशःपते ! इत्यनेन पाठेन तद्व्याख्यया च भाव्यम् ।

टिप्पणी–अयं 'शुकः' कीर इति निवेदयति । कया ? वरगिरा । इतीति किम् ? हे भूप ! तव दस्यवो भुवः 'द्रान्ति' पलायन्ते । किम्भूताः सन्तः ? 'द्राणशौर्य-जयमञ्जुलश्रियः' पलायितप्राण-जयश्रेष्ठश्रियः । किम्भूत हे भूप ! ? द्रव्यवन् ! । किम्भूतः शुकः ? 'द्रष्टिनः' द्रष्टनाथः । पुनः किम्भूतः शुकः ? 'अपशुक्' गतशोकः ॥ ९ ॥

द्वारिकेव हरिणा त्वया पुरी, द्वेष-रोषरहिताऽसते सनत् ।
द्वन्द्वहीन ! सुमहीन ! निःस्पृहाऽद्विड् ! गिरेति निगृणाति कीरराट् ॥१०॥

टिप्पणी–'कीरराट्' शुकराजः 'गिरा' वाण्या इति 'निगृणाति' कथयति । [इतीति किम् ?] 'हे सुमहीन !' शोभनभूनाथ ! त्वया कृत्वा 'पुरी' नगरी 'सनत्' सदा 'असते' शोभते । केन केव ? 'हरिणा' कृष्णेन द्वारिका इव । कथम्भूता पुरी ? द्वेष-रोषरहिता, द्वारिकाऽपीदृगेव । किम्भूत हे सुमहीन ! ? 'द्वन्द्वहीन !' युद्धरहित !, निःस्पृह !, न द्वेष्टीति अद्विट् तदामन्त्रणम् ॥ १० ॥

ध्नेशजयोऽस्खलितांहतितोऽयं, ध्नाधिप ! भूपतिरापति कीर्त्तिम् ।
ध्नं विदधत् स्वकदेवचयस्य, ध्नाभयशा हि शुको वचतीति ॥ ११ ॥

टिप्पणी–'हि' निश्चितं शुक इति वचति । इतीति किम् ? ध्नानां–धनिनां अधिपः ध्नाधिपः तदामन्त्रणं हे ध्नाधिप ! । 'अयं' प्रत्यक्षः भूपतिः कीर्तिं 'आपति' प्राप्नोति । कुतः ? अस्खलितांहतितः । किम्भूतो भूपतिः ? 'ध्नेशजयः' ध्नं–धनं तस्य ईशः ध्नेशः, तं जयतीति ध्नेशजयः । किं कुर्वन् ? स्वकदेवचयस्य 'ध्नं' साधनं 'विदधत्' कुर्वन् । किम्भूतः शुकः ? ध्नः– ईशः तदाभं यशो यस्य स तथा ॥ ११ ॥

ध्यायतीत्ययकमर्क्यरुक् शुको, ध्यानधीर्जयतु भूपराडसौ ।
ध्याढ्य ! नीतिपरिरञ्जितप्रजो, ध्यातदेव-गुरुनामको यतः ॥ १२ ॥

टिप्पणी–'हे ध्याढ्य !' प्रज्ञाढ्य विद्वन् ! 'अयकम्' अयं शुक इति ध्यायति । इतीति किम् ? असौ भूपराड् जयतु । तत्र हेतुमाह–यतः कारणाद् नीतिपरिरञ्जितप्रजः ध्यातदेव-गुरुनामकश्च । किम्भूतः शुकः ? 'अर्क्यरुक्' स्तवनीयकान्तिः । किम्भूतः भूपराड् ? ध्यानधीः ॥ १२ ॥

ध्रायत्यपायैर्विधुरस्त्वदीयो, ध्राताऽतिचित्तस्तव सौम्यदृष्ट्या ।
ध्राणातिचेतांसि महांसि कुर्वन्, ध्रानाथसार्थस्य महीप ! कीरः ॥१३॥

टिप्पणी–हे महीप ! त्वदीयः कीरः 'ध्रायति' तृप्तिं प्राप्नोति । 'अपायैः' कष्टैः 'विधुरः' रहितः । कया ध्रायति ? तव सौम्यदृष्ट्या । पुनः किम्भूतः कीरः ? ध्रातं–तृप्तं

अतिशयेन चित्तं यस्य स तथा । किं कुर्वन् ? 'ध्राणाथसार्थस्य' राजवृन्दस्य 'महांसि' उत्सवान् कुर्वन् । किम्भूतानि ? ध्राणं–तृप्तिं प्राप्तं अतिशयेन चेतो येभ्यस्तानि तथा तानि ॥ १३ ॥

ध्वस्त्वाऽरिसैन्यं विजयी जयत्ययं, ध्वस्ताऽप्रशस्तो नृपतिर्मदीयः ।
ध्वानं करोति प्रमना इतीमं, ध्वाङ्क्षः सुखानामसकौ शुकोऽग्रः ॥१४॥

टिप्पणी–असकौ शुकः इति इमं ध्वानं करोति । इतीति किम् ? अयं मदीयो नृपतिर्विजयी सन् जयति । किं कृत्वा ? अरिसैन्यं ध्वस्त्वा । किम्भूतो नृपतिः ? ध्वस्ताऽप्रशस्तः । किम्भूतः शुकः ? प्रमनाः । पुनः किम्भूतः शुकः ? सुखानां 'ध्वाङ्क्षः' याचकः । पुनः किम्भूतः ? अग्रः ॥ १४ ॥

न्यग्भावमाप्तं वदनं रिपूणां, न्युज्झत्प्रतापं सवितेव सायें ।
न्यायैकमाणिक्यनिधे ! तवेश !, न्यस्यन्नशस्तं वदतीति कीरः ॥ १५ ॥

॥ **शुकवर्णनम्** ॥

टिप्पणी–हे न्यायैकमाणिक्यनिधे ! हे ईश ! तव रिपूणां वदनं 'न्यग्भावं' नीचैस्त्वं 'आप्तं' प्राप्तम्, इति कीरो वदति । किं कुर्वन् ? 'अशस्तं' अमङ्गलं 'न्यस्यन्' निक्षिपन् । किम्भूतं वदनम् ? 'न्युज्झत्प्रतापम्' त्यजत्प्रतापम् । कस्मिन् क इव ? 'सायें' सन्ध्यायां 'सविता इव' सूर्य इव, यथा सायें सूर्यो न्युज्झत्प्रतापो भवति तथेदमपीति ॥ १५ ॥

॥ **शुकवर्णनम्** ॥

त्रेश्वर ! स्फुरति सद्यशस्त्विति, त्रावलीति निगृणाति सुन्दरम् ।
त्राऽमुना जयिजिघांसवो हता, त्रोत्तमा वदति तित्तिरिस्त्विदम् ॥१६॥

टिप्पणी–'हे त्रेश्वर !' नृप ! त्रावली इति सुन्दरं निगृणाति । इतीति किम् ? तित्तिरिरिदं 'वदति' शब्दायते । तदेवाह–अमुना 'त्रा' नृपलक्षणेन पुंसा जयिजिघांसवो हताः, इति सद्यशः स्फुरति । किम्भूता जयिजिघांसवः ? 'त्रोत्तमाः' मनुष्योत्तमाः । तुशब्दौ पादपूरणार्थौ ॥ १६ ॥

न्वाभाभिभूतस्मररूप ! भूपते !, न्वां चञ्चुरां वाचमसौ समुच्चरन् ।
न्वग्रो जयस्तित्तिरिराहवे तव, न्वालीवियुक्तो वचतीति भावी ॥ १७ ॥

टिप्पणी–हे भूपते ! असौ तित्तिरिरिति वचति । इतीति किम् ? 'आहवे' सङ्ग्रामे तव जयो 'भावी' भविता । तित्तिरिः किं कुर्वन् ? 'न्वां' नव्यां 'चञ्चुरां' सुन्दरां वाचं समुच्चरन् । किम्भूत हे भूपते ! ? न्वा–नवा या आभा–शोभा तया अभिभूतं स्मररूपं येन स तथा तदामन्त्रणम् । किम्भूतो जयः ? 'न्वग्रः' स्तुतिश्रेष्ठः । किम्भूतः तित्तिरिः ?

'न्वालीवियुक्तः' पातकालीरहितः "नूशब्दः पातके पुंसि" [विश्वशम्भुएका० ७९] इत्युक्तेः ॥ १७ ॥

प्याढ्यगभीर ! सुतित्तिरिरेष, प्याधिषणाऽतनुराज्यश्रीति ।
प्यात्मगुण ! क्षितिपैतु सुवृद्धिं, प्यग्र ! सुवाक् शुभभाग् महिमाढ्यः॥१८॥

टिप्पणी—हे क्षितिप ! एष सुतित्तिरिः इति अवति—वक्ति—कथयतीत्यध्याहार्यम् । इतीति किम् ? अतनुराज्यश्रीः सुवृद्धिं 'एतु' प्राप्नोतु । किम्भूत हे क्षितिप ! ? प्यः—पयः तेनाढ्यः प्याढ्यः—समुद्रः, तद्वद् गभीरः [तदामन्त्रणम्] । 'प्याधिषण !' कृपाबुद्धे ! । पयः—पवित्रा आत्मगुणा यस्य स तथा तदामन्त्रणम् । 'प्यग्र !' लक्ष्मीश्रेष्ठ ! । किम्भूतः तित्तिरिः ? सुवाक् शुभभाग् महिमाढ्यः, शकुनेषु प्रतीतत्वात् ॥ १८ ॥

प्रष्ठतित्तिरिरयं पुनः पुनः, प्राक्कपिञ्जल इति स्वकाभिधाम् ।
प्रीतिदाय्यनुकरोति यो वदन्, प्राति सोऽभिमतमर्थमीश्वर ! ॥ १९ ॥

प्लक्षो यथा नियतदुस्सहरक्तपित्त-
प्लोषाय मानवचयस्य रुजाजितस्य ।
प्लुष्टामयः खलु तथा खरकोणपक्षी,
प्लुष्णन् जनान् भवतु सन्ततसम्मदाय ॥ २० ॥

॥ तित्तिरिवर्णनम् ॥

[1]प्वो यथा झटिति हन्ति निस्तुषां, [2]प्वां तथा दुरितसन्ततिं नृणाम् ।
[3]प्वात्मभूप ! तव राजहंसकः, [4]प्वाः प्रपालक ! शरीरलोकनात् ॥ २१ ॥

टिप्पणी—१ वायुः । २ धूलिम् । ३ हे पुण्यात्मराजन् ! । ४ भुवः ॥ २१ ॥

[1]फ्यश्वेतशम्भुसमनिर्मलदेहदीप्तिः,
[2]फ्याऽयुक्त एष विदधाति मुदं मरालः ।
[3]फ्यालीद्धतुल्यरमणीयगभीरताग्रः,
[4]फ्याऽतङ्कदोषरहित ! क्षितिप ! त्वदीयः ॥ २२ ॥

टिप्पणी—१ फेन । २ रजरहितः । ३ पयःश्रेणीद्धः, समुद्र इत्यर्थः । ४ मरण ॥ २२ ॥

[1]फ्राकर्णनाद् यस्य भवन्ति सिद्धयः,
[2]फ्राऽऽरिष्टकोटिः स्फुटवेकटोऽकद्रुः[3] [4] ।

क्ष्मादातरुर्वीश्वर ! सत्सितच्छदः,
क्ष्माऽमुद् भृशं भाति सकः सनत् तव ॥ २३ ॥

टिप्पणी– १ शब्दश्रवणात् । २ स्फेटित । ३ जाततारुण्यः । ४ अमत्सरी । ५ लक्ष्मीदातः ! । ६ राजहंसः । ७ ध्वस्ताऽहर्षः ॥ २३ ॥

क्लमिव हन्त्वरिवृन्दममङ्गलं, क्लविशदद्युतिरेष मरालराट् ।
क्लकलहंसकुलस्य विभूषकः, क्लकलभाजितचन्द्र ! महीपते ! ॥ २४ ॥

टिप्पणी– १ वाणपूरम् । २ वपुः । ३ समस्त । ४ वदन ॥ २४ ॥

फ्वुपम ! भूप ! विभात्यतिभासुरः, फ्ववनकृत् तव दिव्यसितच्छदः ।
फ्ववसितौ सुविचक्षण ! सक्षणः, फ्वितरराडभिधानसुखप्रदः ॥ २५ ॥

टिप्पणी–१ इन्द्रोपम ! । २ हे शरणागतत्राणकारिन् ! । ३ मन्त्रावसाने । ४ सफलजल्पनेन राजते ॥ २५ ॥

॥ हंसवर्णनम् ॥

ब्ययुक्त ! वक्ति क्षितिपाऽसकौ बको,
ब्यदीधिते ! वामपदास्थितः सन् ।
ब्यलार्थपत्नीविषयास्तिमीप्सितां,
ब्यनुत्तमः पापविपाकनाशकृत् ! ॥ २६ ॥

टिप्पणी–१ हे सुखयुक्त ! । २ सूर्य । ३ हे पूजनश्रेष्ठ ! । ४ कान्तिश्रेष्ठः ॥ २६ ॥

ब्र-षोडशार्चिःस्तवनीय ! सन्मते !,
ब्रयुक् ! चतस्रः ककुभो विलोकयन् ।
ब्रभा ! बकस्त्वस्त ऋधग् ब्रवीत्यरं,
ब्रचोरभीतिं नृपते ! सुखच्छिदम् ॥ २७ ॥

टिप्पणी–१ बृहस्पति शुक्र । २ हे बलयुक् ! । ३ ब्रह्मदीप्त ! । ४ बहुल० ॥ २७ ॥

ब्लतुल्यतेजो ! वसुधां च पान्थकं,
ब्लयुग् बकः पश्यति यः पुनः पुनः ।

[3]ँलकोपटोप ! क्षितिपाल ! विघ्नकान्,
[4]ँलरूप ! सर्वानुपहन्ति स क्षणात् ॥ २८ ॥

टिप्पणी–१ हे अग्निसमतेजः !। २ बलयुक्। ३ यम । ४ कामरूप !॥ २८॥

[1]ँवबुद्धिजिद्धीः ! स्ववपुर्निरूपयन्,
[2]ँव्रभक्त ! सम्यग् महिलाप्तये भवेत् ।
[3]ँवमानकोर्वीश ! बको विसंशयो,
[4]ँवया प्रदत्तेन्दिरवित्तसद्यशः ॥ २९ ॥

टिप्पणी–१ गीष्पति । २ ब्रह्मा । ३ कृष्णवाक्यमानक !। ४ अम्बया ॥ २९॥

॥ बकवर्णनम् ॥

[1]भ्यक्षित्! समृद्धयै वरकोकयुग्मं, [2]भ्यंस् शस्त्रधारिन्! रव-वीक्षणाभ्याम्।
[3]भ्षानुज्ञ! विज्ञेश! सिमास्पदेषु, [4]भ्युद्धं मुदर्द्धं वदतीति विद्वान् ॥३०॥

टिप्पणी–१ भयहृत् !। २ भयकारि । ३ रौद्राज्ञ !। ४ भीहरम् ॥ ३० ॥

भ्रष्टकष्टशकुनज्ञजना इति, भ्रान्तिहारिण ऋतं निगृणन्त्यरम् ।
[1]भ्राःप्रताप! सविषाददुरारवं, [2]भ्राग् रथाङ्गयुगलं विपदे भवेत् ॥ ३१ ॥

टिप्पणी–१ दीप्तप्रताप !। २ दीप्तम् ॥ ३१ ॥

[1]भ्लासते नरपतेऽतिमनोहरं, [1]भ्लासथूद्धतरथाङ्गयुगं तव ।
भ्लासमानतनुकं हृदयावनं, [2]भ्लांगभस्तिकृतहृत्प्रमदोदयम् ॥ ३२ ॥

टिप्पणी–१ दीप्तिः, प्रताप इति यावत् । २ दीप्त ॥ ३२ ॥

॥ चक्रवाकवर्णनम् ॥

[1]भ्वानाथसेवाविधिसावधान !, [2]भ्वीशोल्लसत्सारसयुग्मदर्शः ।
[3]भ्वानन्ददायी भवतीष्टसौख्य-[3]भ्वैश्वर्यभोक्तः! पथि गच्छतो नुः ॥३३॥

टिप्पणी–१ गौरीनाथ । २ हे भूनाथ !। ३ धन ॥ ३३ ॥

[1]म्यांवर्णिनीलाभविधायकं भवेन्[2]म्यांयुक्तवामं यदि सारसद्वयम् ।
[3]म्यांऽहींरिराजीहर! भूप! सारवं, [4]म्यां-ऽश्वेभमुख्याधिपते! महौजः॥३४॥

टिप्पणी–१ रमा । २ क्षमा । ३ हिंसा । ४ उष्ट्र ॥ ३४ ॥

[1]म्रस्तुल्यकीर्ते ! नृप ! सारसद्वयं, [2]म्रेणायुतैकं सुकृता[3]रवं वरम् ।
[4]म्रक्षेण हीनं किल पार्श्वयाम[5]ले, [6]म्रभ्रष्ट ! वक्त्युत्तमकन्यकापनम् ॥३५॥

टिप्पणी—१ देव । २ हे मैथुनरहित ! । ३ हसत् । ४ रोषेण । ५ द्वये । ६ मृत्युरहित ! ॥ ३५ ॥

म्लानाङ्गभासां मनुजाधिनाथ !, म्लानिं गता वक्त्ररमा रिपूणाम् ।
म्लेयादथाशेषविपक्षचयश्चाऽम्लानेति ते वक्ति [1]सरोजयुग्मम् ॥ ३६ ॥

टिप्पणी—१ सारस ॥ ३६ ॥

॥ सारसवर्णनम् ॥

[1]म्वापतेऽध्वनि विशां हि गच्छतां, [2]म्वस्थितस्य खलु [3]वामनिस्वनः ।
[4]म्वाय टिट्टिभपतत्रिणोऽ[5]गेसे, [6]म्वा-ऽऽमयादिरहितेश्वरश्रियः ॥ ३७ ॥

टिप्पणी—१ धरापते ! । २ वृक्ष । ३ वामशब्दः । ४ उत्तमाय । ५ क्षेमाय । ६ बन्धन ॥ ३७ ॥

ख्यालीकृतस्तोत्रपवित्रचेतोऽख्योर्वीपते ! वै टिटिटीति दीप्तम् ।
ख्याक्षेट्ट टिटीति प्रवरं च शान्तं, ख्योऽस्याऽऽरवद्वन्द्वमुदाहरन्ति ॥३८॥

[1]यॄाधिनाथविधिपूजनकर्त्री, [2]यॄाऽयुतोत्तमतनुर्विबुधाली ।
यॄ[3]व्रजप्रथितमुद् वदतीति, [4]यॄप्रभ ! क्षितिप ! टिट्टिभवर्णम् ॥ ३९ ॥

टिप्पणी—१ यादवपति । २ जरा । ३ स्त्री । ४ जायमान ॥ ३९ ॥

॥ टिट्टिभवर्णनम् ॥

[1]य्वस्थितिस्थिरमनः ! शृणु वर्णान्, [2]य्वाकृतप्रमद ! मोररवस्य ।
[3]य्वप्रधान ! निनदे प्रथमेऽरि[4]य्वप्रकृद् ! द्रविणलाभ ऋधक् स्यात् ॥४०॥

टिप्पणी—१ यज्ञकरणलक्षणा । २ स्त्री । ३ जगत् । ४ मर्दनकारिन् ! ॥ ४० ॥

[1]ल्योल्लसद्गुणगणप्रमणीनां, [2]ल्यारिहार ! लभते सुकलत्रम् ।
[3]ल्यालिबान्धवयशोऽ[4]परावे, [5]ल्यंग्रबर्हिण इलाप्रतिपाल ! ॥ ४१ ॥

टिप्पणी—१ निलय । २ उद्धत । ३ नलिन्यालि । ४ द्वितीय । ५ शब्दाग्र ॥ ४१ ॥

[1]ल्रस्थिताम्बुदविलोकनहर्षाऽल्रावरञ्जितजनस्य तृतीये ।
[2]ल्रप्रमोदद ! शिखण्डिन ऋद्ध्यऽल्रोचिरारव इलापतिभीतिः ॥ ४२ ॥

टिप्पणी—१ ख । २ ललनानन ॥ ४२ ॥

[1]ह्लानाथतुग्वाहनकस्य रङ्गह्लष्टाचलनायक ! चोरभीत्यै ।
[2]ह्लाऽऽह्लाददातुः शिखिनः क्षणात् स्याह्लक्ष्मप्रतिज्ञेद्धतुरीयरावः ॥ ४३ ॥

टिप्पणी—१ गौरी । २ लोक ॥ ४३ ॥

[1]ल्वतातनामस्मृतिकान्तचेता, [2]ल्वैनाहिभुक् पञ्चमनिस्वनः स्यात् ।
[3]ल्वभीतये चान्यजनाज्जनानां, [4]ल्वैपूजकानेकजनप्रमोदिन् ! ॥ ४४ ॥

टिप्पणी—१ लव । २ हे भूनाथ ! । ३ सूदन । ४ रुद्रकृष्ण ॥ ४४ ॥

व्यपोहतीलाप्रतिपाल ! दुष्टां, व्यथां च सत्कर्म करोति शीघ्रम् ।
व्ययेन हीनस्य रवश्च षष्ठो, व्युपाधिराट् सर्पभुजो [1]व्रिराजः ॥ ४५ ॥

टिप्पणी—१ पक्षिराजस्य ॥ ४५ ॥

व्रतीश्वराः शास्त्रविदो वदन्ति, व्रतावना मोररवस्य वर्णान् ।
व्रजद्रुजैतादृशकान् महीप !, व्रजोत्तमाङ्गप्रवरावतंस ! ॥ ४६ ॥

श्यत्याशु दुःखं मनसो जनानां, [1]श्याख्यां प्रभाते कथयन् मयूरः ।
श्यामादिवर्णैः शुभपिच्छदीप्तिः, श्यग्रो महीपाल ! सुनीलकण्ठः ॥४७॥

टिप्पणी—१ आशीर्वचः ॥ ४७ ॥

॥ मयूरवर्णनम् ॥

[1]श्रानाथडिण्डीरहिमांशुवर्ण !, श्रश्रेष्ठ ! चाषः पथि गच्छतो नुः ।
[2]श्रामङ्गलेभ्यः खलु दक्षिणः श्र्याश्रय्यग्र ! भूपाल ! कलानिधान ! ॥४८॥

टिप्पणी—१ गौरी । २ रमा ॥ ४८ ॥

श्लोकशौक्ल्यविजिताऽमृतप्रसूः, श्लाघनीयकिकिदीविमर्क्यभम् ।
श्लाघयन्ति विबुधाः प्रबोधयः, श्लाघ्यपक्षिनिकरेषु सुन्दरम् ॥ ४९ ॥

[1]श्वस्वस्तिकान्तर्गमनेन चाषकोऽ[2]श्वौपात्तभक्षः करति प्रदक्षिणाम् ।
[3]श्वश्रीप्रदाऽभीष्टसुखार्थलब्धयेऽ[4]श्वोर्वीपते ! स्याद्धि यदा तदा मुदा ॥५०॥

टिप्पणी—१ यत्र । २ अशयन । ३ शरण । ४ अमैथुन ॥ ५० ॥

[1]ष्यौघार्घिताङ्घ्रे ! यदि दक्षिणेन, [2]ष्याऽऽभात्म यान्तं किकिदीविमृश्यम् ।
[3]ष्यानन्द ! काकश्च जयेत्तदा स्यात्, [4]ष्यग्राग्रणीः पान्थपराजयाय ॥५१॥

टिप्पणी—१ प्रेष्य । २ शङ्काभात्म । ३ पुत्रानानन्दयतीति । ४ सुख्यग्राग्रणीः ५१

[1]ष्ठः स्तौति वाचेति मुदा प्रवक्ति, [2]ष्ठेन्दत्प्रतापं नृपतिं विलोक्य ।
[3]ष्ठाऽस्पृग् ! भवन्तं पथि चाष एष, [4]ष्ठोद्दामगाम्भीर्ययुजं व्रजन्तम् ॥५२॥

टिप्पणी—१ इन्द्रः । २ सूर्य । ३ कष्टास्पृग् । ४ अर्णव ॥ ५२ ॥

[1]ष्ट्राऽरिष्ट ! शिष्ट ! प्रतिशिष्टदौष्ट्याऽ[2]ष्ट्राऽर्च्योऽथ चाषो जयति प्रकाकम् ।
[3]ष्ट्राग्र्यैः सुधीभिर्विजयो विदेशे, [4]ष्ट्राद्यासनानां कथितोऽध्वगानाम् ॥५३॥

टिप्पणी—१ भ्रष्ट । २ अब्रात्य । ३ विप्रा० । ४ शकटाद्या० ॥ ५३ ॥

[1]ष्टिदार्ढ्य ! शस्त्राहतवैरिवार !, [2]ष्टुदोषरोषेश्वर ! चाषकस्य ।
[3]ष्टुदानबुद्धे ! रुतमीक्षणं च, ष्टु चोपदिष्टं सकलास्पदेषु ॥ ५४ ॥

टिप्पणी—१ यष्टि । २ भ्रष्ट । ३ शरण ॥ ५४ ॥

[1]ष्ठोऽरण्यमध्ये व्रजतः पुरश्चेत्, [2]ष्ठं[3] चाषको यो विदधाति दीप्तम् ।
[4]ष्ठाऽऽभाजिताब्जेट् ! कलहावहः [5]सं, [6]ष्ठाः पण्डिता इत्थमुदाहरन्ति ॥५५॥

टिप्पणी—१ श्रेष्ठः । २ यदि । ३ शब्दम् । ४ वदना० । ५ चाषः । ६ मुखराः ॥ ५५ ॥

स्कन्ताऽऽपदां क्र क्र इति प्रदीप्तः, स्कन्नापदर्केऽर्क इति प्रशान्तः ।
स्कन्धस्थिरोर्वीश ! किकीदिवेश्च, स्कन्दा इति ध्वानयुगं वदन्ति ॥५६॥

॥ चाषवर्णनम् ॥

स्खलितदुष्कृत ! खञ्जनकं बुधाः, स्खलदलीक ! वदन्ति अमूदृशम् ।
स्खलनहीनकयोगयुतं सदाऽस्खलितधीर्मुनिसूनुमिलापते ! ॥ ५७ ॥

स्तु[1]त्योदितेऽगस्त्यमुनौ सुदेशेऽस्ति[2]मंश्च दृष्ट्वा वरखञ्जरीटम् ।
स्तब्धार ! कुर्याद् वरमन्त्रपूजास्तत्सूचिताभीष्टफलस्य सिद्ध्यै ॥ ५८ ॥

टिप्पणी—१ हे । २ हे ॥ ५८ ॥

स्थान ! श्रियां यः कुवपुः कुचेष्टः, स्थास्नो कुदेशे हि निरीक्ष्यतेऽह्नि ।
स्थायिन् ! रणे खञ्जनकः कदाचित्, स्थाण्वर्च ! दृष्ट्वा परिशोषयेत्तम् ॥५९॥

स्थान ! श्रीसुखपेटकस्य कुवपुः सत्खञ्जरीटः खगः,
स्थास्नो भूप ! कुचेष्टितः खलु कुदेशे दृश्यते जातु यः ।
स्थाण्वर्चाविधितत्परामलमते ! दृष्ट्वा विशेषाद् ऋधक्,
स्थायिँस्तं परिशोषयेत् तदुदिताऽसौख्यव्रजध्वस्तये ॥ ६० ॥

॥ खञ्जरीटवर्णनम् ॥

इति श्रीखरतरगच्छीयश्रीजयसागरमहोपाध्यायसन्तानीय-
श्रीज्ञानविमलोपाध्यायमिश्रशिष्यवाचनाचार्य-
श्रीवल्लभगणिकृते विद्वत्प्रबोधनाम्नि शास्त्रे
शुकादि-खञ्जरीटान्तचरणद्वयधारि-
पक्षिवर्णनो नाम द्वितीयः
परिच्छेदः ॥ २ ॥

॥ तृतीयः परिच्छेदः ॥

परिच्छेदे तृतीयेऽथ यत्यादिजनवर्णनम् ।
क्रियते बुधलोकानां कुतुकानन्दहेतवे ॥ १ ॥

स्नेहो गेहे च गेहिन्यमितधनचये नास्ति येषां कदापि,
स्नेहिन्नुर्वीश ! शश्वद्रुचिरचरितसत्पालनप्रह्वचित्ताः ।
स्विद्यन्तस्ते तपस्सु प्रवरमुनिजनाः साधयन्तीष्टमार्गं,
स्नानश्वेताङ्गदीप्ते नृपजनजनितानन्दभन्दा अमन्दाः ॥ २ ॥

स्पन्दं कुर्वन्त्य उर्व्यां प्रचुरवरनरोदारसारप्रबोधं,
स्पष्टं यच्छन्त्य इष्टं रविरुचय इवाम्भोजवृन्दप्रबोधम् ।
स्पर्शेनाऽऽनन्ददायिंच्छ्रमणजनघटा भान्ति दुर्भ्रान्तिमुक्ताः,
स्पष्टा दुष्टेष्टचित्तप्रमदविधिपरज्ञानलक्ष्मीशरीराः ॥ ३ ॥

स्फूर्जत्तेजस्विभास्वन्नविरतमतनुश्रेयसां दायकास्ते,
स्फूर्त्तानन्दाः प्रमोदं विदधतु भवतां साधुलोकाः सुलोकाः ।
स्फूर्जन्ति प्राज्ञवर्य्याः प्रगुणगुणगणा भूतले भूप ! येषां,
स्फूर्त्त्यां चारित्रलक्ष्म्याः प्रविदितयशसः सेवनीया जनानाम् ॥४॥

स्मरन्त इन्दन्त इमे मुनीन्द्राः, स्मार्यां शुभां पञ्चनमस्कृतिं ते ।
स्मयन्त ईशानसुतारमुख्यान्, स्मेराब्जचक्षुः स्वगुणैर्जयन्ति ॥ ५ ॥

॥ साधुवर्णनम् ॥

स्यमीकदातार इव ध्वनन्तः, स्यदेन वादावसरे प्रबुद्धाः ।
स्यान्तार्थसार्थास्तव भान्त्यनेके, स्यमन्त उद्दामसुतर्कशास्त्रम् ॥ ६ ॥

स्त्यायन्तोऽस्ति च नास्ति वस्त्विदमिति प्रत्यक्षमानादिषट्-
स्त्यानोद्दामलसत्प्रमाणकथनप्रह्वाः प्रबुद्धा अमी ।
स्त्यातारो विविधप्रधर्मसुविधेर्धात्रीधवौघाग्रणीः,
स्त्यायन्ति प्रमदोदयादतनुसत्तर्कप्रयुक्तीर्हठात् ॥ ७ ॥

स्रष्टेव सृष्टिं विदधाति दिव्यां, स्राक् शास्त्रराजीं मतिमत्समूहः ।
स्रक्शोभमानाङ्गरुचिर्वचस्वी, स्रस्ताऽतनुस्वीयदुरन्तदुःखः ॥ ८ ॥

[1]स्लश्लाघ्या अघसङ्घसंहतिकृतः शास्त्रेषु लीना भृशं,
[2]स्लः पद्मेष्विव भूपते ! तव पुरे राजन्त्यरं पण्डिताः ।
[3]स्लावल्यर्चितपत्प्रहर्षुलसुराचार्योशनोजिष्णवो-
ऽ[4]स्लाऽमौढ्याढ्यविरूढविश्वमहिमाः संरूढराढावृढाः ॥ ९ ॥

टिप्पणी–१ नर । २ भ्रमरः । ३ अमरालि । ४ सुखि ॥ ९ ॥

स्वीयस्वीयसुदर्शनेष्वविरतं चञ्चत्प्रतिज्ञाभृतः,
स्वच्छातुच्छगुणावसाननिपुणप्रज्ञा गुणिज्ञानिनः ।
स्वर्वास्याश्रयसन्निभे तव महीनाथाग्रणीः ! पत्तने,
स्वाढ्यादूढ्यजनप्रियाः शुभचया बौद्धादयो भान्त्यरम् ॥ १० ॥

॥ पण्डितवर्णनम् ॥

ह्नोतार आस्कन्दनशुष्मणा स्राक्, ह्नोतव्यदैत्यप्रततेः सुशूराः ।
ह्नव्यं वचो नैव निवेदयन्तो, ह्नुत्युन्मनस्त्वां नृप ! रञ्जयन्ति ॥ ११ ॥

[1]ह्यङ्कप्रभास्पर्द्धियशोनिधाना, ह्यो[2]घार्थितेशार्चनसावधानाः ।
[3]ह्याह्लाददातार उदारसाराऽ[4]ह्यालीपते ! भूप ! विभान्ति वीराः ॥ १२ ॥

टिप्पणी–१ मृगाङ्कः । २ नरौघ । ३ हर्षवदाह्लाददाः । ४ दुर्ग ॥ १२ ॥

ह्रीणाः सन्तो वनान्तः सतत[–]वसतिं यत्सुशौर्याभिभूत्या,
ह्रीमन्तश्चक्रिरेऽरं प्रचुरतरतरःसंयुता एणराजाः ।
[1]ह्रौघस्तम्बेरमोक्षव्रजन ! जययुतास्ते त्वदीया महीश !,
[2]ह्रौऽब्रह्माऽनीतिकार्युद्धतमदमथना एत आभान्ति वीराः ॥१३॥

टिप्पणी–१ हंस । २ चौर्यम् ॥ १३ ॥

[1]ह्लादन्ते नृपते ! भवन्तमनिशं दुर्दान्तवीरास्तव,
ह्लत्तिव्रातयुता अकान्तसमिति स्तोतव्यसत्कीर्त्तयः ।
[2]ह्लन्नाऽ[3]ऽमिन्नमनोजनस्तुतलसद्गाम्भीर्यशौर्यादिकान्,
[4]ह्लादन्ते प्रगुणान् गुणान् गुणविदो येषां मुदा बन्दिनः ॥ १४ ॥

टिप्पणी–१ सुखं कुर्वन्ति । २ सुखित । ३ समन्तात् स्नेहवत् । ४ कथयन्ति ॥ १४ ॥

[1]ह्वयन्ति वीरा इति यात कुत्र भो !,
[2]ह्वयन्त ऋद्धानहितान् मिथो युधि ।
[3]ह्वयाऽन्यया सार्द्धमसङ्गकारिणो,
[4]ह्ववैरिवारप्रह्वतौ महीपते ! ॥ १५ ॥

टिप्पणी–१ कथयन्ति । २ स्पर्धमाना । ३ स्त्रिया । ४ प्रह्व ॥ १५ ॥

[1]क्ष्णुतोत्तमास्त्राभ्यसना बलान्यमी,
